द्युम्नेन॑ सं॒यता॑ । सं॒यतेति॑ सं-यता॑ ॥ बृ॒हत्त॑तन्थ । त॒त॒न्थ॒ भा॒नुना॑ । भा॒नुनेति॑ भा॒नुना॑ ॥ नि काव्या॑ । काव्या॑ वे॒धसः॑ । वे॒धस॒श्चश्व॑तः । श॒श्व॑तः स्कः । कर्ह॑स्ते॑ । ह॒स्ते॒ दधा॑नः । दधा॑नो नया॑ः ()

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। नया॑पुरूणि॑ । पु॒रू॒णीति॑ पुरूणि॑ ॥ अ॒ग्निर्भु॑वत् । भु॒व॒द्र॒यि॒पतिः॑ । र॒यि॒पती॑ रयी॒णा॑म् । र॒यि॒पति॒रिति॑ रयि-पतिः॑ । र॒यी॒णा॒म॒ सत्रा । स॒त्रा च॑क्रा॒णः । च॒क्रा॒णो अ॒मृ॑तानि । अ॒मृ॑तानि॒ विश्वा॑ । विश्वेति॒ विश्वा॑ ॥ हिर॑ण्यपाणिमू॒तये॑ । हिर॑ण्यपाणि॒मिति॒ हिर॑ण्य-पाणि॑ । ऊ॒तये॑ सवि॒तार॑म् । स॒वि॒तार॒मुप॑ । उप॑ ह्वये । ह्व॒य॒ इति॑ ह्वये । स चेत्ता॑ । चेत्ता॑ दे॒वता॑ । दे॒वता॑ प॒दम् । प॒दमिति॑ प॒दम् ॥ वा॒मम॒द्य । अ॒द्य स॑वितः । स॒वि॒त॒र्वा॒मम् । वा॒मम्॑ । उ॒ श्वः । श्वो दि॒वेदि॑वे । दि॒वेदि॑वे वा॒मम् । दि॒वेदि॑व॒ इति॑ दि॒वे-दि॒वे । वा॒मम॒स्मभ्य॑ । अ॒स्मभ्य॑ꣳ सावीः । अ॒स्मभ्य॒मित्य॒स्म-भ्य॑म् । सा॒वी॒रिति॑ सावीः ॥ वा॒मस्य॒ हि । हि क्षय॑स्य । क्षय॑स्य देव । दे॒व॒ भूरे॑ः । भूरे॑ र॒या । अ॒या धि॒या । धि॒या वा॑म॒भाज॑ः । वा॒म॒भाज॑ः स्याम । वा॒म॒भाज॒ इति॑ वाम-भाज॑ः । स्या॒मेति॑ स्याम ॥ बडि॒त्था । इ॒त्था पर्व॑तानाम् । पर्व॑तानां खि॒द्रम् । खि॒द्रं बि॑भर्षि । बि॒भ॒र्षि॒ पृ॒थि॒वि । पृ॒थि॒वीति॑ पृथिवि ॥ प्रया । या भूमि । भूमि॒ प्रव॑ति । प्रव॑ति॒ मह्ना॑ । मह्ना॑ जि॒नोषि॑ ()

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। जि॒नोषि॑ महिनि । म॒हि॒नीति॑ महिनि ॥ स्तोमा॑सस्त्वा । त्वा॒ वि॒चा॒रि॒णि॒ । वि॒चा॒रि॒णि॒ प्रति॑ । वि॒चा॒रि॒णीति॑ वि-चा॒रि॒णि॒ । प्रति॑ष्टो भंति । स्तोभ॑न्त्यक्तु॒भिः॑ ॥ अ॒क्तु॒भि॒रित्य॑क्तु-भि॒ः ॥ प्र या । या वाज॑ं । वाज॑ं न । न हेष॑तं । हेष॑तं पे॒रुम् । पे॒रुम॒स्यसि । अ॒स्य॒स्यर्जुनि । अ॒र्जु॒नीत्य॑र्जुनि ॥ ऋ॒दू॒दरे॑ण॒ सख्या॑ । सख्या॑ सचेय । स॒चे॒य॒ यः । यो मा॑ । मा॒ न । न रिष्यै॑त् । रिष्यै॒द्धर्यश्व । ह॒र्य॒श्व॒ पी॒तः । ह॒र्य॒श्वेति॑ हरि-अ॒श्व॒ । पी॒तः इति॑ पी॒तः ॥ अ॒यं यः । यः सोम॑ः । सोमो॒

न्यधा॑यि । न्यधा॑य्य॒स्मे । न्यधा॒यीति॑ नि-अधा॑यि । अ॒स्मे तस्मै॑ । अ॒स्मे इत्य॒स्मे । तस्मा॒ इंद्र॑ । इंद्र॑ प्र॒तिर॑ । प्र॒तिर॑मेमिं । प्र॒तिर॒मिति॑ प्र-तिर॑ । ए॒म्यच्छ॑ । अच्छेत्यच्छ॑ ॥ आपा॑तमन्यु-स्तृपलप्रभर्मा । आपा॑तमन्यु॒रित्यापा॑त-म॒न्युः । तृ॒पल॑प्रभर्मा॒धुनिः॑ । तृ॒पल॑प्रभ॒र्मेति॑ तृ॒पल॑-प्र॒भ॒र्मा॒ । धुनि॒श्चिमी॑वान् । शि॒मी॒वा॒न्छरु॑मान् । शरु॑माग् ऋजी॒षी । शरु॑मा॒निति॒ शरु॑-मा॒न् । ऋ॒जी॒षीत्यृ॑जी॒षी ॥ सोमो॒ विश्वा॑नि । विश्वा॑न्यतसा । अ॒त॒सा॒वना॑नि । वना॑नि॒ न । नार्वाक् । अ॒र्वागिंद्र॑ । इंद्र॑ प्रति॒माना॑नि । प्र॒ति॒माना॑नि देभुः । प्र॒ति॒माना॒नीति॑प्रति-मा॒नानि॑ । दे॒भु॒रिति॑ देभुः ॥ प्रसु॑वा॒नः ()

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। सु॒वा॒न स्सोमः॑ । सोम॑ ऋतयुः । ऋ॒त॒युश्चि॑केत । ऋ॒त॒युरित्यृ॑त-युः । चि॒के॒तेंद्रा॑य । इंद्रा॑य ब्रह्म॑ । ब्रह्म॑ज॒मद॑ग्निः । ज॒मद॑ग्निर्चर्चन्न् । अर्च॒न्नित्यर्च॑न्न् ॥ वृषा॑ यं॒ता । यं॒तासि॑ । अ॒सि॒ श॒व॒सः । श॒व॒सस्तुरस्य॑ । तु॒रस्या॑तः । अ॒तर्य॑च्छ । य॒च्छ॒ गृ॒णते । गृ॒णते ध॒र्त्त॑ । ध॒र्त्त॑र्दृꣳह । दृ॒ꣳहेति॑ दृꣳह ॥ स॒ बाध॑स्ते । स॒बाध॒ इति॑ स-बाधः॑ । ते॒ मद॑ । मद॑ च । च॒ शुष्म॑यम् । शुष्म॑यं च॑ । च॒ ब्रह्म॑ । ब्रह्म॒ नरः॑ । नरो॑ ब्रह्म॒- कृतः॑ । ब्रह्म॑कृत॑स्सपर्यन् । ब्रह्म॑कृत॒ इति॑ ब्रह्म-कृतः॑ । स॒प॒र्य॒न्निति॑ सपर्यन् ॥ अ॒र्को वा॑ । वा॒यत् । य॒त्तु॒रते॑ । तु॒रते॑ सोम॑चक्षाः । सोम॑चक्षा॒स्तत्र॑ । सोम॑चक्षा॒ इति॒ सोम॑-च॒क्षाः॒ । तत्रेत् । इदिंद्रः॑ । इंद्रो॑ दधते । द॒धते॑ पृथ्सु । पृ॒थ्सु तु॒र्याम् । पृ॒त्सि॒तिं॑ पृत्-सु । तु॒र्यामिति॑ तु॒र्याम् ॥ वष॑ट्ट । ते॒ विष्णो । वि॒ष्णो॒ । वि॒ष्णो॒वा॒सः । आ॒स आ । आ कृ॑णोमि । कृ॒णो॒मि॒ तत् । तन्मै॑ । मे॒ जु॒षस्व । जु॒षस्व॒ शि॒पि॒वि॒ष्ट॒ । शि॒पि॒वि॒ष्ट॒ हव्यं॑ । शि॒पि॒वि॒ष्टे॒ति॑ शिपि-वि॒ष्ट॒ । हव्य॒मिति॑ हव्यं () ॥

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

वर्धन्तु ब्वा । ब्वा सुष्टुतयः । सुष्टुतयो गिरः । सुष्टुतय इति सु-स्तुतयः । गिरो मे । मे यूयम् । यूयं पात । पात स्वस्तिभिः । स्वस्तिभिः सदा । दा । स्वस्तिभिरिति स्वस्ति-भिः । सदा नः । न इति नः ॥ प्र तत् । तत्ते । ते अद्य । अद्य शिपिविष्ट । शिपिविष्ट नाम । शिपिविष्टेति शिपि-विष्ट । ना मार्यः । अर्यः। शꣳसामि । शꣳसामि वयुनानि । वयुनानि विद्वान् । विद्वानिति विद्वान् ॥ तं ब्वा । ब्वा गृणामि । गृह्णामि तवस । तवसमतवीयान् । अतवीयान्क्षयत । क्षयतमस्य । अस्य रजसः । रजसः पराके । पराक इति पराके ॥ किमित् । इत्ते । ते विष्णो । विष्णो परिचक्ष्य । विष्णो इति विष्णो । परिचक्ष्य भूत् । परिचक्ष्यमिति परि-चक्ष्य । भूत्र । प्रयत् । यद्ववक्षे । ववक्षे शिपिविष्टः । शिपिविष्टो अस्मि । शिपिविष्ट इति शिपि-विष्टः । अस्मीत्यस्मि ॥ मा वपः । वपा अस्मत् । अस्मदप । अप गूहः । गूह एतत् । एतदत् । यदन्यरूपः । अन्यरूपस्समिथे । अन्यरूप इत्यन्य-रूपः । समिथे बभूथ । समिथ इति सं-इथे । बभूथेति बभूथ ()

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। अग्ने दाः । दादाशुषे । दाशुषेरयिं । रयिं वीरवत । वीरवतं परीणसं । वीरवतमिति वीर-वतं । परीणसमिति परि-नसं ॥ शिशीहि नः । नस्सूनुमतः । सूनुमत इति सूनु-मतः । दानः । नो अग्ने । अग्ने शतिनः । शतिनो दाः । दा स्सहस्रिणः । सहस्रिणोदुरः । दुरो न । न वाज । वाजः श्रुत्यै । श्रुत्या अप । अपावृधि । वृधीति वृधि ॥ प्राची द्यावापृथिवी । प्राची इति प्राची । द्यावापृथिवी ब्रह्मणा । द्यावापृथिवी इति द्यावा । पृथिवी । ब्रह्मणा कृधि । कृधिसुवः । सुवज्ञ । न शुक्रम् । शुक्रमुषसः । उषसो वि । वि दिद्युतुः । दिद्युतुरिति दिद्युतुः ॥ अग्निदाः । दा द्रविणं । द्रविणं वीरपेशाः । वीरपेशा अग्निः । वीरपेशा इति वीर-पेशाः । अग्निर्ऋषिः । ऋषिं यः । यः सहस्रा । सहस्रा सनोति । सनोतीति सनोति ॥ अग्निर्दिवि । दिवि हव्यं । हव्यमा । आततान । ततानाग्नेः । अग्नेर्धामानि । धामानि विभृता । विभृता पुरुत्रा । विभृतेति वि-भृता । पुरुत्रेति पुरु-त्रा ॥ मा नः ()

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -7,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। नो मर्धीः । मर्धीरा । आ तु । तू भर । भरेति भर ॥ घृतं न । न पूतं । पूतं तनूः । तनूररेपाः । अरेपाश्शुचिं । शुचि हिरण्यम् । हिरण्यमिति हिरण्यं ॥ तत्तै । ते रुक्मः । रुक्मो न । न रोचत । रोचत स्वधावः । स्वधाव इति स्वधावः ॥ उभे सुश्चन्द्र । उभे इत्युभे । सुश्चन्द्र सर्पिषः । सुश्चन्द्रेति सु-चन्द्र । सर्पिषो दर्वी । दर्वी श्रीणीषे । दर्वी इति दर्वी । श्रीणीष आसनि । आसनी त्यासनि ॥ उतो नः । उतो इत्युतो । न उत् । उत्पुपूर्याः । पुपूर्या उक्थेषु । उक्थेषु शवसः । शवसस्पते । पत इषे । इषश्चोस्तोतृभ्यः । स्तोतृभ्य आ । स्तोतृभ्य इति स्तोतृ-भ्यः । आभर । भरेति भर ॥ वायो शतं । वायो इति वायो । शतꣳ हरीणाम् । हरीणां युवस्व । युवस्व पोष्याणां । पोष्याणामिति पोष्याणां ॥ उत वा । वा ते । ते सहस्रिणः । सहस्रिणो रथः । रथ आ । आयातु । यातु पाजसा । पाजसेति पाजसा ॥ प्रयाभिः ()

काण्ड -2, प्रपाठक -2, अनुवाक -12, अनुवाक सूक्तम -8,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। याभिर्यासि । यासिदाश्वाꣳसः । दाश्वाꣳसमच्छ । अच्छानियुद्भिः । नियुद्भिर्वायो । नियुद्भिरिति नियुत्-भिः । वाय विष्टये । इष्टये दुरोणे । दुरोण इति दु-ओने ॥ नि नः । नो रयिं । रयिꣳ सुभोजसं । सुभोजसं युव । सुभोजसमिति सु-भोजसं । युवेह । इह नि । नि वीरवत् । वीरवदव्यं । वीरवदिति वीर-वत् । गव्यमश्वियं । अश्वियं च । च राधः । राध इति राधः ॥ रेवतीर्नः । नस्सधमादः । सधमाद इन्द्रे । सधमाद इति सध-मादः । इन्द्रे संतु । संतु तुविवाजाः ॥ तुविवाजा इति तुवि-वाजाः । क्षुमंतो याभिः । याभिर्मदेम । मदेमेति मदेम ॥ रेवाꣳ इत् । इद्रेवतः । रेवतस्स्तोता

। स्तोता स्यात् । स्याच्चावंतः । च्चावंतो मघोनः । च्चावंत् इति च्च-वतः । मघोन् इति मघोनः ॥ प्रेत् । इदु । उहरिवः । हरिवः श्रुतस्य । हरिव इति हरि-वः । श्रुतस्येति श्रुतस्य ()

काण्ड -2, प्रपाठक -3, अनुवाक -1, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

॥ इति द्वितीयकांडे द्वितीयप्रश्नस्य क्रमपाठः समाप्तः ॥ क्रमपाठः आदित्येभ्यो भुवद्वद्भ्यः । भुवद्वद्भ्यश्चरुं । भुवद्वद्भ्य इति भुवद्वत्- भ्यः । चरुं निः । निर्वपेत् । वपेद्भूतिकामः । भूतिकाम आदित्याः । भूतिकाम इति भूति-कामः । आदित्या वै । वा एतं । एतं भूत्यै । भूत्यै प्रति । प्रति नुदते । नुदते यः । योऽलं । अलं भूत्यै । भूत्यै सन् । सन्भूतिं । भूतिं न । न प्राप्नोति । प्राप्नोत्यादित्यान् । प्राप्नोतीति प्र-आप्नोति । आदित्यानेव । एव भुवद्वतः । भुवद्वतः स्वेन । भुवद्वत इति भुवत्-वतः । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति ते । त एव । एवैनं । एनं भूतिं । भूतिं गमयंति । गमयंति भवंति । भवंत्येव । एवादित्येभ्यः । आदित्येभ्यो धारयद्वद्भ्यः । धारयद्वद्भ्यश्चरुं । धारयद्वद्भ्य इति धारयद्वत्-भ्यः । चरुं निः । निर्वपेत् । वपेदपरुद्धः । अपरुद्धो वा । अपरुद्ध इत्यप-रुद्धः । वापरुध्यमानः । अपरुध्यमानो वा । अपरुध्यमान इत्यप-रुध्यमानः । वादित्याः । आदित्या वै । वा अपरोद्धारः । अपरोद्धारं आदित्याः । अपरोद्धार इत्यप-रोद्धारः । आदित्या अवगमयितारः । अवगमयितारं आदित्यान्□ । अवगमयितार इत्यव-गमयितारः । आदित्यानेव । एव धारयद्वतः । धारयद्वत स्वेन । धारयद्वत इति धारयत्-वतः ()

काण्ड -2, प्रपाठक -3, अनुवाक -1, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। स्वेन॑ भागधेये॑न । भागधेये॒नोप॑ । भागधेये॒नेति॑ भाग-धेये॑न । उप॑ धावति । धाव॑ति ते । त एव । एवै॑न॑ । एन॑विशि । विशिदा॑ध्रति । दाध्र॒त्यन॑पऽरुध्यः । अन॑पऽरुध्यो भव॑ति । अन॑पऽरुध्य इत्य॑नप-रुध्यः । भव॒त्यदि॑ते । अदि॒तेऽनु॑ । अनु॑ मन्यस्व । मन्यस्वेति॑ । इत्य॑परुध्यमा॑नः । अप॑रुध्यमा॑नोऽस्य । अप॑रुध्यमा॑न इत्य॑प-रुध्यमा॑नः । अ॒स्य प॒दं । प॒दमा । आद॑दीत । द॒दी॒तेय॑ । इ॒यं वै । वा अदि॑तिः । अदि॑तिरि॒यं । इ॒यमे॒व । एवास्मै॑ । अ॒स्मे॒राज्यं । रा॒ज्यमनु॑ । अनु॑मन्यते । मन्य॒तेऽस॒त्या । स॒त्याशीः । आ॒शीरिति॑ । आ॒शीरित्या॑-शीः । इत्या॑ह । आ॒ह॒ स॒त्यां । स॒त्यामे॒व । एवा-शिष॑ । आ॒शिष॑ कुरुते । आ॒शिष॒मित्या॑-शिष॑ । कु॒रु॒त॒ इ॒ह । इ॒ह मनः॑ । मन॒ इति॑ । इत्या॑ह । आ॒ह॒ प्र॒जाः । प्र॒जा एव । प्र॒जा इति॑ प्र-जाः । एवास्मै॑ । अ॒स्मे॒ सम॑नसः । सम॑नसः करोति । सम॑नस॒ इति॒ स-मन॑सः । क॒रो॒त्युप॑ । उप॒ प्र । प्रेत॑ । इ॒त॒ म॒रु॒तः ()

काण्ड -2, प्रपाठक -3, अनुवाक -1, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। म॒रु॒तः सु॒दा॒न॒वः । सु॒दा॒न॒व एना । सु॒दा॒न॒व इति॑ सु-दा॒न॒वः । एना विश्प॑ति॒ना । विश्प॑ति॒ नाऽभि । अ॒भ्य॑मुम् । अ॒मुꣳ॑ राजा॑नं । राजा॑न॒मिति॑ । इत्या॑ह । आ॒ह॒ मा॒रु॒ती । मा॒रु॒ती वै । वै विट् । विड्ज्यो॒ष्ठः । ज्येष्ठो विश्प॑तिः । विश्प॑ति॒र्विशा । विशै॒व । एवै॑न॑ । एन॒ꣳ॒ राष्ट्रे॑ण । राष्ट्रे॒ण सं । सम॑र्धयति । अ॒र्ध॒य॒ति॒ यः । यः प॒रस्ता॑त् । प॒रस्ता॒द्ग्राम्यवा॑दी । ग्रा॒म्यवा॑दी स्यात् । ग्रा॒म्यवा॑दी॒ति ग्राम्य-वा॑दी । स्यात्तस्य॑ । तस्य॑ गृ॒हात् । गृ॒हाद्व्री॒हीन् । व्री॒हीना । आह॑रेत् । ह॒रे॒च्छु॒क्लान् । शु॒क्लाꣳ॑श्च । च॒ कृ॒ष्णान् । कृ॒ष्णाꣳ॑श्च । च॒ वि । वि चि॑नुयात् । चि॒नु॒या॒द्ये । ये शु॒क्लाः । शु॒क्लास्सु ः । स्युस्तं । तमा॑दि॒त्यं । आ॒दि॒त्यं च॒रुं । च॒रुं निः । निर्व॑पेत् । व॒पे॒दा॒दि॒त्या । आ॒दि॒त्या वै । वै दे॒व॒त॒या । दे॒व॒त॒याविट् । विड्विशं॑ । विश॑मे॒व । एवाव॑ । अव॑ गच्छति ()

काण्ड -2, प्रपाठक -3, अनुवाक -1, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। गच्छत्यवगता । अवगतास्य । अवगतेत्यव-गता । अस्य विट् । विडनवगतं । अनवगतꣳ राष्ट्रं । अनवगतमित्यनव-गतं । राष्ट्रमिति । इत्याहुः । आहुर्ये । ये कृष्णाः । कृष्णास्स्युः । स्युस्तं । तं वारुणं । वारुणं चरुं । चरुं निः । निर्वपेत् । वपेद्वारुणं । वारुणं वै । वै राष्ट्रं । राष्ट्रमुभे । उभे एव । उभे इत्युभे । एव विशँ । विशं च । च राष्ट्रं । राष्ट्रं चं । चावं । अवं गच्छति । गच्छति यदि । यदि न । नावगच्छेँत् । अवगच्छेदिमं । अवगच्छेदित्यव-गच्छेँत् । इममहं । अहमादित्येभ्यः । आदित्येभ्यो भागं । भागं निः । निर्वपामि । वपाम्या । आमुष्मात्ँ । अमुष्मादमुष्यै ँ । अमुष्यै विशः । विशोऽवगंतोः । अवं गंतोरिति । अवगंतोरित्यव-गंतोः । इति निः । निर्वपेत् । वपेदादित्याः । आदित्या एव । एवैनँ । एनं भागधेयँ । भागधेयं प्रेप्संतः । भागधेयमिति भाग-धेयँ । प्रेप्संतो विशँ । प्रेप्संत इति प्र-ईप्संतः । विशमवं ()

काण्ड -2, प्रपाठक -3, अनुवाक -1, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। अवं गमयंति । गमयंति यदि । यदि न । नाव गच्छेँत् । अवगच्छेदाश्वत्थान् । अवगच्छेदित्यव-गच्छेँत् । आश्वत्थान्मयूखान् । मयूखाँन्त्सप्त । सप्तमध्य-मेषायाँ । मध्यमेषायामुपं । मध्यमेषायामिति मध्यम-ईषायाँ । उपंहन्यात् । हन्यादिदं । इदमहं । अहमादित्यान् । अदित्यान्बंध्नामि । बध्नाम्या । आमुष्मात्ँ । अमुष्मादमुष्यै ँ । अमुष्यै विशः । विशोऽवगंतोः । अवगंतोरितिं । अवगंतोरित्यव-गंतोः । इत्यादित्याः । आदित्या एव । एवैनँ । एनं बद्धवीराः । बद्धवीरा विशँ । बद्धवीरा इतिं बद्ध-वीराः । विशमवं । अवगमयंति । गमयंति यदि । यदि न । नावगच्छेँत् । अवगच्छेदेतं । अवगच्छेदित्यव-गच्छेँत् । एतमेव । एवादित्यं । आदित्यंचरुं । चरुं निः । निर्वपेत् । वपेदिध्मे । इध्मेऽपिं । अपिं मयूखान् । मयूखान्सं । सन्नह्येत् । नह्येदनपरुध्यम् । अनपरुध्यमेव । अनपरुध्यमित्यनप-रुध्यम् । एवावं । अवगच्छति । गच्छत्याश्वत्थाः । आश्वत्था भवंति । भवंति मरुताँ । मरुतां वै । वा एतत् । एतदोजः । ओजो यत् ।

यदश्वत्थः । अश्वत्थ ओजसा । ओजसैव । एव विशँ । विशमवं । अवं गच्छति । गच्छति सप्त । सप्त भवंति । भवंति सप्तगंणाः । सप्तगंणा वै । सप्तगंणा इतिं सप्त-गणाः । वै मरुतः । मरुतो गणशः । गणश एव । गणश इतिं गण-शः । एव विशँ । विश मवं । अवं गच्छति । गच्छतीतिं गच्छति () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

देवा वै । वै मृत्योः । मृत्योरंबिभयुः । अबिभयुस्ते । ते प्रजा- पंतिं । प्रजापंतिमुपं । प्रजापंतिमितिं प्रजा-पतिं । उपांधावन् । अधावन्तेभ्यः । तेभ्य एतां । एतां प्रांजापत्यां । प्राजापत्याꣳ शतकृंष्णलां । प्राजापत्यामितिं प्राजा-पत्यां । शतकृंष्णलां निः । शतकृंष्णलामितिं शत-कृष्णलां । निरंवपत् । अवपत्तयाँ । तयैव । एवैषुं । एष्वमृतँ । अमृतंमदधात् । अदधादाः । यो मृत्योः । मृत्योर्बिभीयात् । बिभीयात्तस्मैं । तस्मा एतां । एतां प्रांजापत्यां । प्राजापत्याꣳ शतकृंष्णलां । प्राजापत्यामितिं प्राजा-पत्यां । शतकृंष्णलां निः । शतकृंष्णलामितिं शत-कृष्णलां । निर्वपेत् । वपेत्प्रजापंतिं । प्रजापंतिमेव । प्रजापंतिमितिं प्रजा-पतिं । एव स्वेनं । स्वेनं भागधेयेंन । भागधेयेनोपं । भागधेयेनेतिं भाग-धेयेंन । उपं धावति । धावति सः । स एव । एवास्मिन्नं् । अस्मिन्नायुः । आयुर्दधाति । दधाति सर्वँ । सर्वमायुः । आयुरेति । एति शतकृंष्णला । शतकृंष्णला भवति । शतकृंष्णलेतिं शत-कृष्णला । भवति शतायुः । शतायुः पुरुंषः । शतायुरितिं शत-आयुः । पुरुंष- श्शतेंन्द्रियः । शतेंन्द्रिय आयुंषि । शतेंन्द्रिय इतिं शत-इंन्द्रियः । आयंष्येव । एवेंन्द्रिये ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। इंन्द्रिये प्रतिं । प्रतिं तिष्ठति । तिष्ठति घृते । घृते भवति । भवत्यायुः । आयुर्वै । वै घृतं । घृतममृतँ । अमृतꣳ हिरंण्यं । हिरंण्यमायुः । आयुश्च । चैव । एवास्मैं । अस्मा अमृतँ । अमृतं च । च समीचीँ । समीचीं दधाति ।

स॒मीची॒ इति॑ स॒मीची॑ । दधा॑ति च॒त्वारि॑चत्वारि । च॒त्वारि॑चत्वारि कृ॒ष्णला॑नि । च॒त्वारि॑चत्वारी॒ति च॒त्वारि॑-च॒त्वारि॑ । कृ॒ष्णला॒न्यव॑ । अव॑दधति । द॒धति॒ चतु॒रव॑त्तस्य॑ । चतु॒रव॑त्तस्यास्यै॑ । चतु॒रव॑त्तस्ये॒ति॑ चतुः॒- अव॑त्तस्य॑ । आस्या॑ एकधा । एकधा ब्रह्मणे॑ । एकधे॒त्ये॑क-धा । ब्रह्म॑ण उप॑ । उप॑ हरति । ह॒र॒त्ये॒कधा । एकधे॑व । एकधे॒त्ये॑क-धा । एव यज॑माने । यज॑मान॒ आयुः॑ । आयु॑र्दधाति । द॒धा॒त्य॒सौ । अ॒सौ॒वा॑दि॒त्यः । आ॒दि॒त्यो न । न वि । व्य॑रोचत । अ॒रो॒च॒त॒ तस्मै॑ । तस्मै॑ देवाः । देवाः प्राय॑श्चित्तिं । प्राय॑श्चित्ति मेच्छन् । ऐच्छ॒न्तस्मै॑ । तस्मा॑एतं । एत॑ꣳ सौ॒र्यं । सौ॒र्यं च॒रुं । च॒रुं निः । निर्व॑पन् । अव॑पन्ते॒न॑ । ते ने॒व । एवास्मिन्न्॑ ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। अ॒स्मि॒न्नु॒चं॑ । रुच॑मदधुः । अ॒द॒धु॒र्यः । यो ब्र॑ह्मवर्च॒सका॑मः । ब्र॒ह्म॒व॒र्च॒सका॑म॒स्स्यात् । ब्र॒ह्म॒व॒र्च॒सका॑म॒ इति॑ ब्रह्मवर्च॒स-का॒मः॒ । स्यात्तस्मै॑ । तस्मा॑ एतं । एत॑ꣳ सौ॒र्यं । सौ॒र्यं च॒रुं । च॒रुं निः । निर्व॑पेत् । व॒पे॒दमु॒म् । अ॒मु॒मे॒व । एवादि॒त्यं । आ॒दि॒त्यꣳ स्वेन॑ । स्वेन॑ भाग॒धये॑न । भा॒ग॒धये॒नोप॑ । भा॒ग॒धये॒नेति॑ भाग-धये॑न । उप॑ धावति । धा॒व॒ति॒ सः । स एव । एवास्मिन्न्॑ । अ॒स्मि॒ब्र॒ह्म॒व॒र्च॒सं । ब्र॒ह्म॒व॒र्च॒सं द॑धाति । ब्र॒ह्म॒व॒र्च॒समिति॑ ब्रह्म-व॒र्च॒सं । द॒धा॒ति॒ ब्र॒ह्म॒व॒र्च॒सी । ब्र॒ह्म॒व॒र्च॒स्ये॑व । ब्र॒ह्म॒व॒र्च॒सीति॑ ब्रह्म-व॒र्च॒सी । एव भ॑वति । भ॒व॒त्युभ॒यतः॑ । उ॒भ॒यतो॑ रु॒क्मौ । रु॒क्मौ भ॑वतः । भ॒व॒त॒ उ॒भ॒यतः॑ । उ॒भ॒यत॑ एव । एवास्मिन्न्॑ । अ॒स्मि॒न्नु॒चं॑ । रुच॑ं दधाति । द॒धा॒ति॒ प्र॒या॒जेप्र॑याजे । प्र॒या॒जेप्र॑याजे कृ॒ष्णल॑ं । प्र॒या॒जेप्र॑याज॒ इति॑ प्रयाजे-प्रयाजे । कृ॒ष्णल॑ं जुहोति । जु॒होति॒ दिग्भ्यः॑ । दिग्भ्य एव । दिग्भ्य इति॑ दिक्-भ्यः॑ । एवास्मै॑ । अ॒स्मे ब्र॒ह्म॒व॒र्च॒सं । ब्र॒ह्म॒व॒र्च॒समव॑ । ब्र॒ह्म॒व॒र्च॒समिति॑ ब्रह्म-व॒र्च॒सं । अव॑ रुंधे । रु॒ंध॒ आग्ने॒यं । आग्ने॒यम॒ष्टाक॑पालं । अ॒ष्टाक॑पाल॒ं निः । अ॒ष्टाक॑पाल॒मित्य॒ष्टा- क॒पाल॑ं । निर्व॑पेत् । व॒पे॒त्सा॒वि॒त्रं । सा॒वि॒त्रं द्वाद॑शकपालं । द्वाद॑शकपाल॒ं भू॒म्यै॑ ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। द्वादशकपालमिति द्वादश-कपालं । भूम्यै चरुं । चरुं यः । यः कामयेत । कामयेत हिरण्यं । हिरण्यं विंदेय । विंदेय हिरण्यं । हिरण्यं मा । मोप । उपनमेत् । नमेदिति । इति यत् । यदाग्नेयः । आग्नेयो भवति । भवत्याग्नेयं । आग्नेयं वै । वै हिरण्यं । हिरण्यं यस्य । यस्यैव । एव हिरण्यं । हिरण्यं तेन । तेनैव । एवैनत् । एनद्विंदते । विंदते सावित्रः । सावित्रो भवति । भवति सवितृ प्रसूतः । सवितृ प्रसूत एव । सवितृ प्रसूत इति सवितृ-प्रसूतः । एवैनत् । एनद्विंदते । विंदते भूमै । भूमै चरुः । चरुर्भवति । भवत्यस्याम् । अस्या मेव । एवैनत् । एनद्विंदते । विंदत उप । उपैनं । एनꣳ हिरण्यं । हिरण्यं नमति । नमति वि । वि वै । वा एषः । एष इंद्रियेण । इंद्रियेण वीर्येण । वीर्येणर्ध्यते । ऋध्यतेयः । यो हिरण्यं । हिरण्यं विंदतै । विंदत एतां ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। एतामेव । एव निः । निर्वपेत् । वपेद्धिरण्यं । हिरण्यं विद्वा । विद्वा न । नेंद्रियेण । इंद्रियेण वीर्येण । वीर्येण वि । व्यृध्यते । ऋध्यत एतां । एतामेव । एव निः । निर्वपेत् । वपेदस्य । यस्य हिरण्यं । हिरण्यं नश्यैत् । नश्येदत् । यदाग्नेयः । आग्नेयो भवति । भवत्याग्नेयं । आग्नेयं वै । वै हिरण्यं । हिरण्यं यस्य । यस्यैव । एव हिरण्यं । हिरण्यं तेन । तेनैव । एवैनत् । एनद्विंदति । विंदति सावित्रः । सावित्रो भवति । भवति सवितृप्रसूतः । सवितृप्रसूत एव । सवितृप्रसूत इति सवितृ-प्रसूतः । एवैनत् । एनद्विंदति । विंदति भूम्यै । भूम्यै चरुः । चरुर्भवति । भवत्यस्यां । अस्यां वै । वा एतत् । एतन्नश्यति । नश्यति यत् । यन्नश्यति । नश्यत्यस्यां । अस्यामेव । एवैनत् । एनद्विंदति । विंदतींद्रः ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। इंद्र स्त्वष्टुः । त्वष्टुस्सोमँ । सोमंमभीषहाँ । अभीषहांपिबत् । अभीषहेत्यभि-सहाँ । अपिबथ्सः । सविष्वङ् ।
विष्वङ्हि । व्यार्छत् । आर्छत्सः । स इंद्रियेण । इंद्रियेण सोमपीथेन । सोमपीथेन वि । सोमपीथेनेतिं सोम-पीथेन ।
व्यार्ध्यत । आर्ध्यत सः । स यत् । यदूर्ध्वं । ऊर्ध्वमुद-वंमीत् । उदवंमीत्ते । उदवंमीदित्युत्-अवंमीत् । ते श्यामाकाँः ।
श्यामाकां अभवन् । अभवन्सः । स प्रजापंतिं । प्रजापंतिमुपं । प्रजापंतिमितिं प्रजा-पतिं । उपांधावत् । अधावत्तस्मैं
। तस्मां एतं । एतꣳ सोंमेंद्रं । सोमेंद्रꣳः श्यांमाकं । श्यामाकं चरुं । चरुं निः । निरंवपत् । अवपत्तेनं । तेनैव ।
एवास्मिन्नं् । अस्मिन्निंद्रियं । इंद्रियꣳ सोंमपीथं । सोमपीथमंदधात् । सोमपीथमितिं सोम-पीथं । अदधा द्वि । वि वै ।
वा एषः । एष इंद्रियेणं । इंद्रियेणं सोमपीथेनं । सोमपीथेनंर्ध्यते । सोमपीथेनेतिं सोम-पीथेनं । ऋध्यते यः । यस्सोमँ
। सोमं वमिंति । वमिंति यः । य स्सोंमवामी । सोमवामीस्यात् । सोमवामीतिं सोम-वामी । स्यात्तस्मैं ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -7,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। तस्मां एतं । एतꣳ सोंमेंद्रं । सोमेंद्रꣳः श्यांमाकं । श्यामाकं चरुं । चरुं निः । निर्वपेत् । वपेथ्सोमँ । सोमं च ।
चैव । एवेंद्रँ । इंद्रं च । च स्वेनं । स्वेनं भागधेयेंन । भागधेयेनोपं । भागधेयेनेतिं भाग-धेयेंन । उपं धावति । धावति
तौ । तावेव । एवास्मिन्नं् । अस्मिन्निंद्रियं । इंद्रियꣳ सोंमपीथं । सोमपीथं धत्तः । सोमपीथ मितिं सोम-पीथं । धत्तो
न । नेंद्रियेणं । इंद्रियेणं सोमपीथेनं । सोमपीथेन वि । सोमपीथेनेतिं सोम-पीथेनं । वृंध्यते । ऋध्यते यत् ।
यथ्सौम्यः । सौम्यो भवंति । भवंति सोमपीथं । सोमपीथमेव । सोमपीथमितिं सोम-पीथं । एवावं । अवं रुंधे । रुंधे
यत् । यदैंद्रः । ऐंद्रो भवंति । भवंतींद्रियं । इंद्रियं वै । वै सोंमपीथः । सोमपीथ इंद्रियं । सोमपीथ इतिं सोम-पीथः
। इंद्रियमेव । एव सोंमपीथं । सोमपीथमवं । सोमपीथमितिं सोम-पीथं । अवं रुंधे । रुंधे श्यामाकः । श्यामाको
भंवति । भवत्येषः । एष वाव । वाव सः । स सोमः ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -8,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। सोमः साक्षात् । साक्षादेव । साक्षादिति स-अक्षात् । एव सोमपीथं । सोमपीथमवं । सोमपीथमिति सोम-पीथं । अवं रुंधे । रुंधेऽग्नयै । अग्नये दात्रे । दात्रे पुरोडाशं । पुरोडाशमष्टाकपालं । अष्टाकपालं निः । अष्टाकपालमित्यष्टा-कपालं । निर्वपेत् । वपेदिंद्राय । इंद्राय प्रदात्रे । प्रदात्रे पुरोडाशं । प्रदात्र इति प्र-दात्रे । पुरोडाश-मेकादशकपालं । एकादशकपालं पशुकामः । एकादशकपालमित्येकादश-कपालं । पशुकामोऽग्निः । पशुकाम इति पशु-कामः । अग्निरेव । एवास्मै । अस्मे पशून् । पशून्प्रजनयति । प्रजनयति वृद्धान् । प्रजनयतीति प्र-जनयति । वृद्धानिंद्रः । इंद्रः प्र । पयच्छति । यच्छति दधिं । दधि मधुं । मधुं घृतं । घृतमापः । अपो धानाः । धाना भवंति । भवंत्येतत् । एतद्वै । वै पशूनां । पशूनाꣳ रूपं । रूपꣳ रूपेण । रूपेणैव । एव पशून् । पशूनवं । अवं रुंधे । रुंधे पंचगृहीतं । पंचगृहीतं भवति । पंचगृहीत मिति पंच-गृहीतं । भवति पांक्तः । पांक्ता हि । हि पशवः । पशवो बहु रूपं । बहुरूपं भवति । बहुरूपमिति बहु-रूपं । भवति बहुरूपाः । बहुरूपा हि । बहुरूपा इति बहु-रूपाः । हि पशवः ()

काण्ड -2, प्रपाठक -3, अनुवाक -2, अनुवाक सूक्तम -9,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। पशवः समृद्ध्यै । समृद्ध्यै प्राजापत्यं । समृद्ध्या इति स-ऋद्ध्यै । प्राजापत्यं भवति । प्राजापत्यमिति प्राजा-पत्यं । भवति प्राजापत्याः । प्राजापत्या वै । प्राजापत्या इति प्राजा-पत्याः । वै पशवः । पशवः प्रजापतिः । प्रजापतिरेव । प्रजापतिरिति प्रजा-पतिः । एवास्मै । अस्मे पशून् । पशून्र । प्रजनयति । जनयत्यात्मा । आत्मा वै । वै पुरुषस्य । पुरुषस्य मधुं । मधु यत् । यन्मधुं । मध्वग्नौ । अग्नौ जुहोतिं । जुहोत्यात्मानँ । आत्मानमेव । एव तत् । तद्यजमानः । यजमानोग्नौ । अग्नौ प्र । प्रदधाति । दधाति पंक्त्यौं । पंक्त्यौयाज्यानुवाक्यै । याज्यानुवाक्यै भवतः । याज्यानुवाक्यै

इति॑ याज्या-अनुवाक्ये॑ । भवतः॑ पाक्तः॑ । पाक्तः॑ पुरु॑षः । पुरु॑षः पाक्ताः॑ । पाक्ताः॑ पशवः॑ । पशव॑ आत्मा॑न॒म् । आत्मा॑न॒मे॑व । एव मृत्योः॑ । मृत्योर्निष्क्रीय॑ । निष्क्रीय॑ पशून् । निष्क्रीये॑ति॒ निः-क्रीय॑ । पशून॑व । अव॑रुंधे । रुंध इति॑ रुंधे ()

॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -3, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

देवा वै । वै सत्रं । सत्रमा॑सत । आसतर्धि॑परिमितं । ऋद्धि॑परिमितं॒ यश॑स्कामाः । ऋद्धि॑परिमित॒मित्यृद्धि॑-परिमितं । यश॑स्कामास्तेषा॒॑ । यश॑स्कामा॒ इति॒ यश॑ः-कामा॒ः । तेषा॒ꣳ सोम॒॑ । सोम॒ꣳ राजा॑नं । राजा॑नं॒ यश॑ः । यश॑ आर्छत् । आर्छ॒थ्सः । स गि॒रिम् । गि॒रिमुत् । उदै॑त् । ऐत्तं । तम॒ग्निः । अ॒ग्निरनु॑ । अनूत् । उदै॑त् । ऐत्तौ । तावग्नीषोमौ॑ । अ॒ग्नीषोमौ॒ सं । अ॒ग्नीषोमा॒वित्य॒ग्नी-सोमौ॑ । सम॑भवतां । अ॒भव॒तां॒ तौ । ताविंद्रः॑ । इंद्रो॑ यज्ञवि॑भ्रष्टः । यज्ञवि॑भ्रष्टोऽनु॑ । यज्ञवि॑भ्रष्ट इति॑ यज्ञ-वि॒भ्रष्टः॑ । अनु॒ परा॒॑ । परै॑त् । ऐत्तौ । तावब्रवीत् । अ॒ब्र॒वी॒दा॒जय॑तं । याजय॑तं॒ मा । मेति॑ । इति॒ तस्मै॑ । तस्मा॑ एतां । एतामिष्टि॒॑ । इष्टिं निः । निर॑वपतां । अ॒व॒पता॒-माग्नेयं । आग्नेय॒मष्टा॑कपालं । अ॒ष्टा॑कपाल॒मैंद्रं । अ॒ष्टा॑कपाल॒मित्य॒ष्टा-क॒पा॒लं । ऐंद्र॒मेका॑दशकपालं । एका॑दशकपाल॒ꣳ सौम्यं । एका॑दशकपाल॒ मित्येका॑दश-क॒पा॒लं । सौम्यं च॒रुं । च॒रुं तया॒॑ । तये॑व । एवास्मिन्न्॑ । अ॒स्मि॒न्ने॒जः॑ ()

काण्ड -2, प्रपाठक -3, अनुवाक -3, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। तेज॑ इंद्रि॒यं । इंद्रि॒यं ब्रह्मवर्च॑सं । ब्रह्मवर्च॑स-मधत्तां । ब्रह्मवर्च॑स॒मिति॑ ब्रह्म-वर्च॑सं । अ॒ध॒त्तां॒ यः । यो यज्ञवि॑भ्रष्टः । यज्ञवि॑भ्रष्ट स्स्यात् । यज्ञवि॑भ्रष्ट इति॑ यज्ञ-वि॒भ्रष्टः॑ । स्यात्तस्मै॑ । तस्मा॑ एतां । एतामिष्टि॒॑ । इष्टिं निः । निर्व॑पेत् । व॒पेदा॒ग्नेयं । आग्नेय॒मष्टा॑कपालं । अ॒ष्टा॑कपाल॒मैंद्रं । अ॒ष्टा॑कपाल॒मित्य॒ष्टा-क॒पा॒लं । ऐंद्र॒मेका॑दशकपालं । एका॑दशकपाल॒ꣳ

सौम्यं । एकादशकपालमित्येकादश-कपालं । सौम्यं चरुं । चरुं यत् । यदाग्नेयः । आग्नेयो भवति । भवति तेजः । तेज एव । एवास्मिन्न् । अस्मिन्तेनं । तेन दधाति । दधाति यत् । यदैंद्रः । ऐंद्रो भवति । भवतींद्रियं । इंद्रियमेव । एवास्मिन्न् । अस्मिन्तेनं । तेन दधाति । दधाति यत् । यथ्सौम्यः । सौम्यो ब्रह्मवर्चसं । ब्रह्मवर्चसं तेन । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । तेनाग्नेयस्य । आग्नेयस्य च । च सौम्यस्य । सौम्यस्य च । चैंद्रे । ऐंद्रे समाश्लेषयेत् । समाश्लेषये त्तेजः । समाश्लेषयेदिति सं-अश्लेषयेत् । तेजश्च । चैव । एवास्मिन्न् । अस्मिन्ब्रह्मवर्चसं । ब्रह्मवर्चसं च । ब्रह्मवर्चमिति ब्रह्म-वर्चसं । च समिची ()

काण्ड -2, प्रपाठक -3, अनुवाक -3, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। समिची दधाति । समीची इति समीची । दधात्यग्नीषोमियं । अग्नीषोमियमेकादशकपालं । अग्नीषोमीयमीत्यग्नी-सोमीयं । एकादशकपालं निः । एकादशकपाल मित्येकादश-कपालं । निर्वपेत् । वपेद्यं । यं कामः । कामोन । नोप नमेत् । उपनमेदाग्नेयः । उपनमेदित्युप-नमेत् । आग्नेयो वै । वै ब्राह्मणः । ब्राह्मणस्सः । स सोमं । सोमं पिबति । पिबति स्वां । स्वामेव । एव देवतां । देवताꣳ स्वेनं । स्वेनं भागधेयेन । भागधेयेनोपं । भागधेयेनेति भाग-धेयेन । उपं धावति । धावति सा । सैव । एवैनं । एनं कामेन । कामेन सं । समर्धयति । अर्धयत्युपं । उपैनं । एनं कामः । कामो नमति । नमत्यग्नीषोमीयं । अग्नीषोमीयमष्टाकपालं । अग्नी षोमीयमित्यग्नी-सोमीयं । अष्टाकपालं निः । अष्टाकपालमित्यष्टा-कपालं । निर्वपेत् । वपेद्ब्रह्मवर्चसकामः । ब्रह्मवर्चसकामोऽग्नीषोमौ । ब्रह्मवर्चस काम इति ब्रह्मवर्चस-कामः । अग्नीषोमावेव । अग्नीषोमा वित्यग्नी-सोमौ । एव स्वेनं । स्वेनं भागधेयेन । भागधेयेनोपं । भागधेयेनेति भाग-धेयेन । उपं धावति । धावति तौ । तावेव । एवास्मिन्न् । अस्मिन्ब्रह्मवर्चसं । ब्रह्मवर्चसं धत्तः । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । धत्तो ब्रह्मवर्चसी । ब्रह्मवर्चस्येव ()

काण्ड -2, प्रपाठक -3, अनुवाक -3, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। ब्रह्मवर्चसीति ब्रह्म-वर्चसी । एव भवति । भवति यत् । यदष्टाकपालः । अष्टाकपालस्तेन । अष्टाकपाल इत्यष्टा-कपालः । तेनाग्नेयः । आग्नेयो यत् । यच्छ्यामाकः । श्यामाकस्तेन । तेन सौम्यः । सौम्यस्समृद्ध्यै । समृद्ध्यै सोमाय । समृद्ध्या इति सं-ऋद्ध्यै । सोमाय वाजिनै । वाजिनैश्श्यामाकं । श्यामाकं चरुं । चरुं निः । निर्वपेत् । वपेदाः । यः क्लैब्यात् । क्लैब्याद्बिभियात् । बिभीयादेतः । रेतो हि । हि वै । वा एतस्मात् । एतस्माद्वाजिनं । वाजिनमपक्रामति । अपक्रामत्यथ । अपक्रामतीत्यप-क्रामति । अथेषः । एष क्लैब्यात् । क्लैब्याद्बिभाय । बिभाय सोमम् । सोमं मेव । एव वाजिनम् । वाजिनश्श्वेनं । श्वेनं भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवास्मिन् । अस्मिन्रेतः । रेतो वाजिनं । वाजिनं दधाति । दधाति न । न क्लीबः । क्लीबो भवति । भवति ब्राह्मणस्पत्यं । ब्राह्मणस्पत्यमेकादशकपालं । ब्राह्मणस्पत्यमिति ब्राह्मणः-पत्यं । एकादशकपालं निः । एकादशकपालमित्येकादश-कपालं । निर्वपेत् । वपेद्ग्रामकामः । ग्रामकामो ब्रह्मणः । ग्रामकाम इति ग्राम-कामः ()

काण्ड -2, प्रपाठक -3, अनुवाक -3, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। ब्रह्मणस्पतिम् । पतिमेव । एव श्वेनं । श्वेनं भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवास्मै । अस्मै सजातान् । सजातान्म । सजातानिति स-जातान् । प्रयच्छति । यच्छति ग्रामी । ग्राम्येव । एव भवति । भवति गणवती । गणवती याज्यानुवाक्यै । गणवती इति गण-वती । याज्यानुवाक्ये भवतः । याज्यानु वाक्ये इति याज्या-अनुवाक्यै । भवतस्सजातेः । सजातेरेव । सजातेरिति स-जातेः । एवैनं । एनं गणवंतं । गणवंतं करोति । गणवंतमिति गण-वंतं । करोत्येतां । एतामेव । एव निः । निर्वपेत् । वपेदाः । यः काम-येत । कामयेत ब्रह्मन् । ब्रह्मन्विशं । विशं वि । विनाशयेयम् । नाशयेयमिति । इति मारुती । मारुती याज्यानुवाक्यै

। मारुती इति मारुती । याज्यानुवाक्ये कुर्यात् । याज्यानुवाक्ये इति याज्या-अनुवाक्ये । कुर्याद्ब्रह्मन् । ब्रह्मन्नेव । एव विशँ । विशं वि । विनाशयति । नाशयतीति नाशयति () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -4, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

आर्यम्णे चरुं । चरुं निः । निर्वपेत् । वपेथ्सुवर्गकामः । सुवर्ग-कामोऽसौ । सुवर्ग काम इति सुवर्ग-कामः । असौ वै । वा आदित्यः । आदित्यौर्यमा । अर्यमार्यमणँम् । अर्यमण मेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवैनँ । एनꣳ सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं गमयति । गमयत्यर्यम्णे । अर्यम्णे चरुं । चरुं निः । निर्वपेत् । वपेद्यः । यः कामयेत । कामयेत दान कामाः । दानकामा मे । दानकामा इति दान-कामाः । मे प्रजाः । प्रजास्स्युः । प्रजा इति प्र-जाः । स्युरिति । इत्यसौ । असौ वै । वा आदित्यः । आदित्यौर्यमा । अर्यमा ँ१११ ँ । यः खलु । खलु वै । वेददाति । ददाति सः । सौर्यमा । अर्यमार्यमणँम् । अर्यमणमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव ()

काण्ड -2, प्रपाठक -3, अनुवाक -4, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। एवास्मै । अस्मेदानकामाः । दानकामाः प्रजाः । दानकामा इति दान-कामाः । प्रजाः करोति । प्रजा इति प्र-जाः । करोति दानकामाः । दानकामा अस्मै । दानकामा इति दान-कामाः । अस्मै प्रजाः । प्रजा भवंति । प्रजा इति प्र-जाः । भवंत्यर्यम्णे । अर्यम्णे चरुं । चरुं निः । निर्वपेत् । वपेद्यः । यः कामयेत । कामयेत स्वस्ति । स्वस्ति जनताँ । जनतामियाम् । इयामिति । इत्यसौ । असौ वै । वा आदित्यः । आदित्यौर्यमा । अर्यमार्य मणँ । अर्यमण मेव ।

एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवैनँ । एनं तत् । तद्गमयति । गमयति यत्र । यत्र जिगंमिषति । जिगंमिषतींद्रः । इंद्रो वै । वै देवानाँ । देवानामानुजावरः । आनुजावर आसीत् । आनुजावर इत्यानु-जावरः । आसीथ्सः । स प्रजापतिं । प्रजापतिमुप । प्रजापतिमिति प्रजा-पतिं । उपाधावत् । अधावत्तस्मैँ । तस्मा एतं । एतमैंद्रं । ऐंद्र मानुषूकम् । आनुषूकमेकादशकपालं । आनुषूकमित्यानु-सूकं । एकादशकपालं निः । एकादशकपालमित्येकादश-कपालं ()

काण्ड -2, प्रपाठक -3, अनुवाक -4, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। निरवपत् । अवपत्तेन । तेनैव । एवैनँ । एनमग्रँ । अग्रं देवतानां । देवतानां परिं । पर्यणयत् । अनयद्बुध्नवंती । बुध्नवंती अग्रवती । बुध्नवंती इतिं बुध्न-वती । अग्रवती याज्यानुवाक्यैँ । अग्रवती इत्यग्र-वती । याज्यानुवाक्यें अकरोत् । याज्यानुवाक्यें इतिं याज्या-अनुवाक्यैँ । अकरोद्बुध्नात् । बुध्ना देव । एवैनँ । एनमग्रँ । अग्रं परिं । पर्यणयत् । अनयदः । यो राजन्यः । राजन्य आनुजावरः । आनुजावरः स्यात् । आनुजावर इत्यानु-जावरः । स्यात्तस्मैँ । तस्मा एतं । एतमैंद्रं । ऐंद्रमानुषूकं । आनुषूकमेकादश-कपालं । आनुषूकमित्यानु-सूकं । एकादशकापालं निः । एकादशकपालं मित्येकादश-कपालं । निर्वपेत् । वपेदिंद्रँ । इंद्रमेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवैनँ । एनमग्रँ । अग्रꣳ समानानाँ । समानानां परिं । परिंणयति । नयति बुध्नवंती । बुध्नवंती अग्रवती । बुध्नवंती इतिं बुध्न-वती । अग्रवती याज्यानुवाक्यैँ । अग्रवती इत्यग्र-वती । याज्यानुवाक्यें भवतः । याज्यानुवाक्यें इतिं याज्या-अनुवाक्यैँ । भवतो बुध्नात् । बुद्ना देव । एवैनँ । एनमग्रँ ()

काण्ड -2, प्रपाठक -3, अनुवाक -4, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। अग्रं परि । परिणयति । नयत्यानुपूकः । आनुपूको भवति । आनुपूक इत्यानु-सूकः । भवत्येषा । एषाहि । ह्येतस्य । एतस्य देवताँ । देवतायः । य आनुजावरः । अनुजावर- स्समृद्ध्यै । आनुजावर इत्यानु-जावरः । समृद्ध्यै यः । समृद्ध्या इति सं-ऋद्ध्यै । यो ब्राह्मणः । ब्राह्मण अनुजावरः । आनुजावर स्स्यात् । आनुजावर इत्यानु-जावरः । स्यात्तस्मै । तस्मा एतं । एतं बार्हस्पत्यं । बार्हस्पत्य मानुपूकं । आनुपूकं चरुं । आनुपूक मित्यानु-सूकं । चरुं निः । निर्वपेत् । वपेद्बृहस्पतिँ । बृहस्पतिं मेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवैनँ । एनमग्रँ । अग्रꣳ समानानाँ । समानानां परि । परिण- यति । नयति बुध्नवती । बुध्नवती अग्रवती । बुध्नवती इति बुध्न-वती । अग्रवती याज्यानुवाक्यै । अग्रवती इत्यग्र-वती । याज्यानुवाक्ये भवतः । याज्यानुवाक्ये इति याज्या-अनुवाक्यै । भवतो बुध्नात् । बुध्नादेव । एवैनँ । एनमग्रँ । अग्रं परि । परिणयति । नयत्यानुपूकः । आनुपूको भवति । आनुपूक इत्यानु-सूकः । भवत्येषा । एषा हि । ह्येतस्य । एतस्य देवताँ । देवता यः । य आनुजावरः । आनुजावरस्समृद्ध्यै । आनुजावर इत्यानु-जावरः । समृद्ध्या इति सं-ऋद्ध्यै () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -5, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

प्रजापतेस्त्रयस्त्रिꣳशत् । प्रजापतेरिति प्रजा-पतेः । त्रय-स्त्रिꣳशद्दुहितरः । त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत् । दुहितर आसन् । आसन्ताः । तास्सोमाय । सोमाय राज्ञे । राज्ञेऽददात् । अददात्तासाँ । तासाꣳ रोहिणीं । रोहिणीमुप । ऊपैत् । ऐत्ताः । ता ईर्ष्यंतीः । ईर्ष्यंतीः पुनः । पुनरगच्छन् । अगच्छन्ताः । ता अनु । अन्वैत् । ऐत्ताः । ताः पुनः । पुनरयाचत । अयाचत ताः । ता अस्मै । अस्मै न । न पुनः । पुनरददात् । अददाथ्सः । सोऽब्रवीत् । अब्रवीदृतं । ऋतममीष्व । अमीष्व यथाँ । यथा समावच्छः । समावच्छ उपेष्यामि । समावच्छ इति समावत्-शः । उपेष्या- म्यथ

। उपेष्यामीत्युप-एष्यामि । अथ ते । ते पुनः । पुनर्दास्यामि । दास्यामीति । इति सः । स ऋतम् । ऋतमामीत् । आमीत्ताः । ता अस्मै । अस्मै पुनः । पुनरददात् । अददात्तासाँ । तासाꣳ रोहिणीम् । रोहिणीमेव । एवोप ()

काण्ड -2, प्रपाठक -3, अनुवाक -5, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। उपैत् । ऐत्तं । तं यक्ष्मः । यक्ष्म आर्छत् । आर्छद्राजानं । राजानं यक्ष्मः । यक्ष्म आरत् । आरदिति । इति तत् । तद्राजयक्ष्मस्य । राजयक्ष्मस्य जन्म । राजयक्ष्मस्येति राज-यक्ष्मस्य । जन्म यत् । यत्पापी- यान् । पापीयानभवत् । अभवत्तत् । तत्पापयक्ष्मस्य । पापयक्ष्मस्य यत् । पापयक्ष्मस्येति पाप-यक्ष्मस्य । यज्ञायाभ्यः । ज्ञायाभ्यो विन्दत् । अविन्द- त्तत् । तज्ञायेन्यस्य । ज्ञायेन्यस्य यः । य एवं । एवमेतेषाँ । एतेषां यक्ष्माणां । यक्ष्माणां जन्म । जन्म वेद । वेद न । नैनँ । एनमेते । एते यक्ष्माः । यक्ष्मा विन्दन्ति । विन्दन्ति सः । स एताः । एता एव । एव नमस्यन्न्। नमस्यन्नुप । उपाधावत् । अधावत्ताः । ता अब्रुवन्न् । अब्रुवन्वरँ । वरं वृणामहै । वृणामहै समावच्छः । समावच्छ एव । समावच्छ इति समावत्-शः । एव नः । नउप । उपायः । अय इति । इति तस्मै । तस्मा एतम् ()

काण्ड -2, प्रपाठक -3, अनुवाक -5, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। एत मादित्यं । आदित्यं चरुं । चरुं निः । निरवपन्न् । अवपन्तेन । तेनैव । एवैनँ । एनं पापात् । पापाथ्स्वामाँत् । स्वामादमुंचन्न् । अमुंचन्, यः । यः पापयक्ष्मगृहीतः । पापयक्ष्मगृहीतस्स्यात् । पापयक्ष्म गृहीत इति पापयक्ष्म-गृहीतः । स्यात्तस्मै । तस्मा एतं । एतमादित्यं । अदित्यं चरुं । चरुं निः । निर्वपेत् । वपेदादित्यान् । आदित्यानेव । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति ते । त एव । एवैनँ । एनं पापात् । पापाथ्स्वामाँत् । स्वामाँन्मुंचति । मुंचत्यमावास्यायां । अमावास्यायां निः । अमावास्याया मित्यमा-वास्यायाम् ।

निर्वपेत् । वपेदमुम् । अमुमेव । एवैनँ । एनमाप्याय-मानम् । आप्यायमानमनु । आप्यायमानमित्याँ-प्यायमानम् । अन्वा । आप्यायति । प्याययति नवोनवः । नवोनवो भवति । नवोनव इति नवः-नवः । भवति जायमानः । जायमान इति । इति पुरोनुवाक्याँ । पुरोनुवाक्या भवति । पुरोनुवाक्येति पुरः-अनुवाक्याँ । भवत्यायुः । आयुरेव । एवास्मिन् । अस्मिन्तयाँ । तया दधाति । दधाति यम् । यमादित्याः । आदित्या अꣳशुम् । अꣳशुमाँप्याययति । अप्याययतीति । आप्याययतीत्याँ-प्याययति । इति याज्याँ । याज्या । ऐव । एवैनँ । एनमेतयाँ । एतयाँप्याययति । प्याययतीति प्याययति () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -6, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

प्रजापतिर्देवेभ्यः । प्रजापतिरिति प्रजा-पतिः । देवेभ्योन्नाद्यं । अन्नाद्यंव्यादिशत् । अन्नाद्यमित्यन्न-अद्यँ । व्यादिशध्सः । व्यादिशदिति वि-आदिशत् । सोँऽब्रवीत् । अब्रवीदयत् । यदिमान् । इमाल्लोकान् । लोकानभि । अभ्यतिरिच्यते । अतिरिच्यातै तत् । अतिरिच्याता इत्यति-रिच्यातै । तन्ममं । ममासत् । असदिति । इति तत् । तदिमान् । इमाल्लोकान् । लोकानभि । अभ्यति । अत्यरिच्यत अरिच्यतेंद्रँ । इंद्रꣳ राजानम् । राजानमिंद्रँ । इंद्रमधिराजम् । अदिराजमिंद्रँ । अदिराजामित्यधि-राजम् । इंद्रꣳꣳस्वराजानम् । स्वराजानं ततः । स्वराजानमिति स्व-राजानम् । ततो वै । वै सः । स इमान् । इमाल्लोकान् । लोकाꣳ स्त्रेधा । त्रेधादुहत् । अदुहत्तत् । तत्त्रिधातोँ । त्रिधातोँस्त्रिधातुत्वं । त्रिधातोरिति त्रि-धातोँ । त्रिधातुत्वं यं । त्रिधातुत्वमिति त्रिधातु-त्वम् । यं कामयेत । कामयेता- न्नादः । अन्नादस्याँ त् । अन्नाद इत्यन्न-अदः । स्यादिति । इति तस्मैँ । तस्मा एतं । एतं त्रिधातुँ । त्रिधातुं निः । त्रिधातुमिति त्रि-धातुँ । निर्वपेत् । वपेदिंद्राय । इंद्राय राज्ञेँ । राज्ञे पुरोडाशँ ()

काण्ड -2, प्रपाठक -3, अनुवाक -6, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। पुरोडाशमेकादशकपालं । एकादशकपालमिंद्राय । एकादशकपालमित्येकादश-कपालं । इंद्रायाधि-राजाय । अधिराजायेंद्राय । अदिराजायेत्यधि-राजाय । इंद्राय स्वराज्ञै । ँस्वराज्ञेयं । स्वराज्ञ इति स्व-राज्ञै । अयं वै । वा इंद्रः । इंद्रो राजा । राजायं । अयमिंद्रः । इंद्रोधि राजः । अदिराजोऽ सौ । अदिराज इत्यधि-राजः । असाविंद्रः । इंद्रः स्वराट् । स्वराडिमान् । स्वराडिति स्व-राट् । इमानेव । एव लोकान् । लोकान्त्सेनं । स्वेनं भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति ते । त एव । एवास्मै । अस्मा अन्नं । अन्नं प्र । प्रयच्छंति । यच्छंत्यन्नादः । अन्नाद एव । अन्नाद इत्यन्न-अदः । एव भवति । भवति यथा । यथा वत्सेनं । वत्सेन प्रत्तां । प्रत्तां गां । गां दुहे । दुह एवं । एवमेव । एवेमान् । इमाल्लोकान् । लोकान्प्रत्तान्न् । प्रत्तान्कामं । कामंमन्नाद्यं । अन्नाद्यं दुहे । अन्नाद्यमित्यन्न-अद्यं । दुह उत्तानेषु । उत्तानेषु कपालेषु । उत्तानेष्वित्युत्-तानेषु । कपालेष्वधि । अधि श्रयति । श्रयत्ययातयामब्राय । अयातयामब्रायत्रयः । अयातयामब्रायेत्ययातयाम-ब्राय । त्रयः पुरोडाशाः । पुरोडाशा भवंति । भवंति त्रयः । त्रय इमे । इमे लोकाः । लोका एषाम् । एषां लोकानां । लोकानामाप्त्यै । आप्त्या उत्तर?उत्तरः । उत्तर?उत्तरो ज्यायान्न् । उत्तर उत्तर इत्युत्तरः-उत्तरः । ज्यायान्भवति । भवत्येवम् । एवमिव । इव हि । हीमे । इमे लोकाः । लोकास्समृद्ध्यै । समृद्ध्यै सर्वेषां । समृद्ध्या इति सं-ऋद्ध्यै । सर्वेषामभिगमयन्न् । अभिगमयन्नव । अभिगमयन्नित्यभि-गमयन्न् । अव द्यति । द्यत्यछंबट्कारं । अछंबट्कारं व्यत्यासं । अछंबट्कारमित्यछंबट्-कारं । व्यत्यासमनु । व्यत्यासमिति वि-अत्यासं । अन्वाह । आहानिर्दाहाय । अनिर्दाहायेत्यनिः-दाहाय () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -7, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

देवासुरा स्संयत्ताः । देवासुरा इति देव-असुराः । संयत्ता आसन्न् । संयत्ता इति सं-यत्ताः । आसन्तान् । तान्देवान् । देवानसुराः । असुरा अजयन्न् । अजयन्ते । ते देवाः । देवाः पराजिग्यानाः । पराजिग्याना असुराणां । पराजिग्याना

इति॑ परा-जि॒ग्यानाः । असु॑राणा॒ वैश्य॑ । वैश्य॒मुप॑ । उपा॑यन् । आ॒य॒न्तेभ्यः॑ । तेभ्य॑ इ॒न्द्रि॒यं । इ॒न्द्रि॒यं वी॒र्य॑ । वी॒र्य॑मप॑ । अपा॑क्रामत् । अ॒क्रा॒म॒त्तत् । तदिंद्रः॑ । इ॒न्द्रोऽचा॑यत् । अ॒चा॒य॒त्तत् । तदनु॑ । अन्वप॑ । अपा॑क्रामत् । अ॒क्रा॒म॒त्तत् । तद॑व॒रुध॑ । अ॒व॒रुध॑ न । अ॒व॒रुध॒मित्य॑व-रुध॑ । नाश॑क्नोत् । अ॒श॒क्नो॒त्तत् । तद॑स्मात् । अ॒स्मा॒दभ्यर्धः॑ । अ॒भ्यर्धो॑ चरत् । अ॒भ्यर्ध इत्य॑भि-अ॒र्धः॑ । अ॒च॒र॒थ्सः । स प्र॒जाप॑तिं । प्र॒जाप॑तिमुप॑ । प्र॒जाप॑ति मिति॑ प्र॒जा-प॑तिं । उपा॑धावत् । अ॒धा॒व॒त्तं । तमे॒तया॑ । ए॒तया॒ सर्व॑- पृष्ठया । सर्व॑पृष्ठयायाजयत् । सर्व॑पृष्ठयेति॒ सर्व॑-पृष्ठया । अ॒या॒ज॒य॒त्तया॑ । तयै॒व । ए॒वास्मिन्न् । अ॒स्मिन्निंद्रि॑यं । इ॒न्द्रि॒यं वी॒र्य॑ । वी॒र्य॑मदधात् । अ॒द॒धा॒द्यः । य इ॑न्द्रि॒यका॑मः । इ॒न्द्रि॒यका॑मो वी॒र्यका॑मः । इ॒न्द्रि॒यका॑म॒ इ॒तीन्द्रि॑य-का॒मः ()

काण्ड -2, प्रपाठक -3, अनुवाक -7, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। वी॒र्य॑कामस्सा त् । वी॒र्य॑काम॒ इति॑ वी॒र्य॑-का॒मः॑ । स्स्यात्तम् । तमे॒तया॑ । ए॒तया॒ सर्व॑पृष्ठया । सर्व॑पृष्ठया याजयेत् । सर्व॑पृष्ठयेति॒ सर्व॑-पृष्ठया । याज॒येदे॒ताः । ए॒ता ए॒व । ए॒व दे॒वता॑ः । दे॒वताः॒ स्वेन॑ । स्वेन॑ भागधेये॑न । भा॒ग॒धेये॒नोप॑ । भा॒ग॒धेये॒नेति॑ भाग-धेये॑न । उप॑ धावति । धा॒व॒ति॒ ताः । ता ए॒व । ए॒वास्मिन्न् । अ॒स्मि॒न्निंद्रि॑यं । इ॒न्द्रि॒यं वी॒र्य॑ । वी॒र्य॑ दधति । दधा॑ति॒ यत् । यदिंद्रा॑य । इ॒न्द्रा॑य॒ राथं॑तराय । राथं॑तराय नि॒र्वप॑ति । राथं॑तरा॒येति॒ राथ॑-तरा॒य॒ । नि॒र्वप॑ति॒ यत् । नि॒र्वप॒तीति॑ निः-वप॑ति । य दे॒व । ए॒वाग्नेः । अ॒ग्नेस्तेज॑ः । तेज॒स्तत् । तदे॒व । ए॒वाव॑ । अव॑ रुंधे । रुं॒धे॒ यत् । यदिंद्रा॑य । इ॒न्द्रा॑य॒ बार्ह॑ताय । बार्ह॑ताय॒ यत् । यदे॒व । ए॒वेंद्र॑स्य । इ॒न्द्र॑स्य॒ तेज॑ः । तेज॒स्तत् । त दे॒व । ए॒वाव॑ । अव॑रुंधे । रुं॒धे॒ यत् । यदिंद्रा॑य । इ॒न्द्रा॑य॒ वै रू॒पाय॑ । वै॒रू॒पाय॒ यत् । य दे॒व । ए॒व सं॑वि॒तुः । स॒वि॒तुस्तेज॑ः । तेज॒स्तत् ()

काण्ड -2, प्रपाठक -3, अनुवाक -7, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। तदेव । एवावं । अवं रुंधे । रुंधे यत् । यदिंद्रांय । इंद्रांय वैराजांय । वैराजांय यत् । यदेव । एंव धातुः । धातुस्तेजः । तेजस्तत् । तदेव । एवावं । अवं रुंधे । रुंधे यत् । यदिंद्रांय । इंद्रांय शाक्करायं । शाक्करांय यत् । यदेव । एव मरुतां । मरुतां तेजः । तेज स्तत् । तदेव । एवावं । अवं रुंधे । रुंधे यत् । यदिंद्रांय । इंद्रांय रैवतायं । रैवतांय यत् । यदेव । एव बृहस्पतेः । बृहस्पतेस्तेजः । तेजस्तत् । त देव । एवावं । अवंरुंधे । रुंध एतावंन्ति । एतावंन्ति वै । वै तेजांꣳसि । तेजांꣳसि तानिं । तान्येव । एवावं । अवंरुंधे । रुंध उत्तानेषुं । उत्तानेषुं कपालेंषु । उत्तानेष्वित्युंत्-तानेषुं । कपालेष्वधिं । अधिंश्रयति । श्रयत्ययांतयामब्राय । अयांतयामब्रायद्वादंशकपालः । अयांतयामब्रायेत्ययांतयाम-ब्रांय । द्वादंशकपालः पुरोडाशः । द्वादंशकपाल इति द्वादंश-कपालः । पुरोडाशो भवति ()

काण्ड -2, प्रपाठक -3, अनुवाक -7, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। भवति वैश्वदेव ब्रायं । वैश्वदेवब्रायं समंतं । वैश्वदेवब्रायेतिं वैश्वदेव-ब्रायं । समंतं पर्यवंद्यति । समंतमितिं सं-अंतम् । पर्यवंद्यति समंतं । पर्यवंद्यतीतिं परि-अवंद्यति । समंतमेव । समंतमितिं सं-अंतम् । एवेंद्रियं । इंद्रियं वीर्यं । वीर्यं यजंमाने । यजंमाने दधाति । दधाति व्यत्यासं । व्यत्यासमनुं । व्यत्यासमितिं वि-अत्यासं । अन्वांह । आहानिंर्दा-हाय । अनिंर्दाहायाश्वः । अनिंर्दाहायेत्यनिः-दाहांय । अश्वं ऋषभः । ऋषभो वृष्णिः । वृष्णिर्बस्तः । बस्तस्सा । सा दक्षिंणा । दक्षिंणा वृषब्रायं । वृषब्रायेतयां । वृषब्रायेतिं वृष-ब्रायं । एतयेव । एव यंजेत । यजेताभिशस्यमांनः । अभिशस्यमांन एताः । अभिशस्यमांन इत्यंभि-शस्यमांनः । एताश्च । चेत् । इद्वै । वा अंस्य । अस्य देवताः । देवता अन्नं । अन्नंमदंतिं । अदंत्यदंतिं । अदंत्युं । उवेव । एवास्यं । अस्यमनुष्याः । मनुष्या इतिं मनुष्याः () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -8, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

रज॑नो॒ वै । वै कौ॑णेयः । कौ॒णे॒यः क्र॑तु॒जित॑ँ । क्र॒तु॒जित॒ञ्जान॑किं । क्र॒तु॒जित॒मिति॑ क्रतु-जित॑ँ । जान॑किं चक्षु॒र्वन्य॑ँ । च॒क्षु॒र्वन्य॑मयात् । च॒क्षु॒र्वन्य॒ मिति॑ चक्षुः-वन्य॑ँ । अ॒या॒त्तस्मै॑ । तस्मा॑ एतं । ए॒तामिष्टि॑ँ । इष्टि॑ निः । निर्व॑- वपत् । अ॒व॒प॒द॒ग्नये॑ । अ॒ग्नये॑ भ्राज॑स्वते । भ्राज॑स्वते पुरो॒डाश॑ँ । पु॒रो॒डाश॑म॒ष्टाक॑पालं । अ॒ष्टाक॑पाल॒ꣳ॒ सौर्यं । अ॒ष्टाक॑पाल॒मित्य॒ष्टा-क॒पा॒लं॒ । सौर्यं॑ च॒रुं । च॒रु॒म॒ग्नये॑ । अ॒ग्नये॑ भ्राज॑स्वते । भ्राज॑स्वते पुरो॒डाश॑ँ । पु॒रो॒डाश॑म॒ष्टाक॑पालं । अ॒ष्टाक॑पालं॒ तया॑ँ । अ॒ष्टाक॑पाल॒मित्य॒ष्टा-क॒पा॒लं॒ । तयै॒व । ए॒वास्मिन्न्॑ । अ॒स्मि॒न्नच॑क्षुः । चक्षु॑रदधात् । अ॒द॒धा॒द्यः । यश्चक्षु॑ष्कामः । चक्षु॑ष्काम॒स्स्यात् । चक्षु॑ष्काम॒ इति॒ चक्षुः-काम॒ः । स्यात्तस्मै॑ । तस्मा॑ एतं । ए॒तामिष्टि॑ँ । इष्टि॑ निः । निर्व॑पेत् । व॒पे॒द॒ग्नये॑ । अ॒ग्नये॑ भा॑जस्वते । भ्राज॑स्वते पुरो॒डाश॑ँ । पु॒रो॒डाश॑म॒ष्टाक॑पालं । अ॒ष्टाक॑पाल॒ꣳ॒ सौर्यं । अ॒ष्टाक॑पाल॒ मित्य॒ष्टा-क॒पा॒लं॒ । सौर्यं॑ च॒रुं । च॒रु॒म॒ग्नये॑ । अ॒ग्नये॑ भा॑जस्वते । भ्राज॑स्वते पुरो॒डाश॑ँ । पु॒रो॒डाश॑म॒ष्टाक॑पालं । अ॒ष्टाक॑पाल॒मग्नेः । अ॒ष्टाक॑पाल॒मित्य॒ष्टा-क॒पा॒लं॒ । अ॒ग्नेर्वै । वै च॒क्षु॒षा । च॒क्षु॒षा मनु॒ष्या॑ँ । म॒नु॒ष्या॑ वि ()

काण्ड -2, प्रपाठक -3, अनुवाक -8, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। वि प॑श्यंति । प॒श्य॒न्ति॒ सूर्य॑स्य । सूर्य॑स्य दे॒वाः । दे॒वा अ॒ग्निं । अ॒ग्निं च॑ । चै॒व । ए॒व सूर्य॑ँ । सूर्यं॑ च । च॒ स्वेन॑ । स्वेन॑ भागधेये॑न । भा॒ग॒धे॒ये॒नोप॑ । भा॒ग॒धे॒ये॒नेति॑ भाग-धे॒ये॑न । उप॑ धावति । धा॒व॒ति॒ तौ । तावे॒व । ए॒वास्मिन्न्॑ । अ॒स्मि॒न्नच॑क्षुः । चक्षु॑र्धत्तः । ध॒त्त॒श्चक्षु॑ष्मान् । चक्षु॑ष्मानेव । ए॒व भ॑वति । भ॒व॒ति॒ यत् । यदा॑ग्ने॒यौ । आ॒ग्ने॒यौ भ॑वतः । भ॒व॒त॒श्चक्षु॑षी । चक्षु॑षी ए॒व । चक्षु॑षी॒ इति॒ चक्षु॑षी । ए॒वास्मिन्न्॑ । अ॒स्मि॒न्तत् । तत्प्रति॑ । प्रति॑ दधाति । द॒धा॒ति॒ यत् । यश्सौ॑र्यः । सौ॒र्यो नासि॑कां । नासि॑कां॒ तेन॑ । तेनाभितः॑ । अ॒भि॒तस्सौ॑र्यं । सौ॒र्यमा॑ग्ने॒यौ । आ॒ग्ने॒यौ भ॑वतः । भ॒व॒त॒ स्तस्मा॑त् । तस्मा॒दभितः॑ । अ॒भि॒तो नासि॑कां । नासि॑कां चक्षु॑षी । चक्षु॑षी॒ तस्मा॑त् । चक्षु॑षी॒ इति॒ चक्षु॑षी । तस्मा॒न्नासि॑कया । नासि॑कया॒ चक्षु॑षी । चक्षु॑षी॒ विधृ॑ते । चक्षु॑षी॒ इति॒ चक्षु॑षी । विधृ॑ते॒ समा॑नी । विधृ॑ते॒ इति॒ वि-धृ॒ते॒ । स॒मा॒नी या॑ँज्यानुवा॒क्यै॑ँ । स॒मा॒नी इति॑ समा॒नी । या॒ज्या॒नु॒वा॒क्यै॑ भवतः । या॒ज्या॒नु॒वा॒क्यै॑ इति॑ याज्या-अनुवा॒क्यै॑ँ ।

भवतस्समानं । समानꣳ हि । हि चक्षुः । चक्षुस्समृंद्धे । समृंद्धा उत् । समृंद्धा इति सं-ऋद्धे । उदु । उत्यं । त्यं जातवेदसं । जातवेदसꣳ सप्त । जातवेदसमिति जात-वेदसं । सप्त ँआ । ँआ हरितः । हरितो रथे । रथे चित्रं । चित्रं देवानाँ । देवानामुत् । उदगात् । अगादनीकं । अनीकमिति । इति पिंडान् । पिंडान्प्र । प्रयच्छति । यच्छति चक्षुः । चक्षु रेव । एवास्मै । अस्मे प्र । प्रयच्छति । यच्छति यत् । यदेव । एव तस्य । तस्य तत् । तदिति तत् () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -9, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

ध्रुवोऽसि । असि ध्रुवः । ध्रुवोऽहं । अहꣳ संजातेषु । सजातेषु भूयासं । सजातेष्विति स-जातेषु । भूयासं धीरः । धीर श्चेत्ताँ । चेत्तां वसुवित् । वसुविद्ध्रुवः । वसुविदिति वसु-वित् । ध्रुवोऽसि । असि ध्रुवः । ध्रुवोऽहं । अहꣳ संजातेषु । सजातेषु भूयासं । सजातेष्विति स-जातेषु । भूया समुग्रः । उग्रश्चेत्ताँ । चेत्तांवसुवित् । वसुविद्ध्रुवः । वसुविदिति वसु-वित् । ध्रुवोऽसि । असि ध्रुवः । ध्रुवोऽहं । अहꣳ संजातेषु । सजातेषु भूयासं । सजातेष्विति स-जातेषु । भूयासमभिभूः । अभिभूश्चेत्ताँ । अभिभूरित्यभि-भूः । चेत्तां वसुवित् । वसुविदामनं । वसुविदिति वसु-वित् । आमनमसि । आमनमित्या-मनं । अस्यामनस्य । आमनस्य देवाः । आमनस्येत्या-मनस्य । देवा ये । ये संजाताः । सजाताः कुमाराः । सजाता इति स-जाताः । कुमारास्समनसः । समनसस्तान् । समनस इति स-मनसः । तानहं । अहं कामये । कामये हृदा । हृदा ते । ते माम् । मां कामयंताम् । कामयंताꣳ हृदा । हृदा । तान् । तान्मै । म आमनसः । आमनसः कृधि । आमनस इत्या-मनसः । कृधि स्वाहाँ । स्वाहामनं । आमनमसि । आमनमित्या- मनं ()

काण्ड -2, प्रपाठक -3, अनुवाक -9, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। अ॒स्याम॑नस्य । आम॑नस्य देवाः । अम॑न॒स्येत्या-म॒न॒स्य॒ । दे॒वा॒ याः । याः स्त्रियः॑ । स्त्रिय॒स्समम॑नसः । सम॑नस॒स्ताः । सम॑नस॒ इति॒ स-म॒न॒सः॒ । ता अ॒हं । अ॒हं का॑मये । का॒म॒ये॒ हृ॒दा । हृ॒दाताः॑ । तामाम् । मां का॑मयंताम् । का॒म॒य॒ंता॒ꣳ॒ हृ॒दा । हृ॒दा ताः । तामैं । म॒ आम॑नसः । आम॑नसःकृधि । अम॑नस॒ इत्य-म॒न॒सः॒ । कृ॒धि॒ स्वाहा॑ । स्वाहा॑ वैश्वदे॒वीम् । वै॒श्व॒देवीꣳ॒ सा॑ँग्रह॒णीं । वै॒श्व॒देवीमिति॑ वैश्व-दे॒वीम् । सा॒ग्र॒ह॒णीं निः । सा॒ग्र॒ह॒णीमिति॑ सा॑-ग्र॒ह॒णीं । निर्व॑पेत् । व॒पे॒द्ग्राम॑कामः । ग्राम॑कामो वैश्वदे॒वाः । ग्राम॑काम॒ इति॒ ग्राम॑-का॒मः॒ । वै॒श्व॒देवा वै । वै॒श्व॒देवा इति॑ वैश्व-दे॒वाः॒ । वै सं॑जा॒ताः॒ । स॒जा॒ता विश्वान्॑ । स॒जा॒ता इति॑ स-जा॒ताः॒ । विश्वा॑नेव । एव दे॒वान् । दे॒वान॑श्नेन॑ । श्ने॒न॑ भागधेये॑न । भा॒ग॒धेये॒नोप॑ । भा॒ग॒धेये॒नेति॑ भाग-धेये॑न । उप॑ धावति । धा॒व॒ति॒ ते । त एव । एवास्मै॑ । अ॒स्मै॒ स॒जा॒तान् । स॒जा॒तान्प्र । स॒जा॒तानिति॑ स-जा॒तान् । प्रय॑च्छंति । य॒च्छं॒ति॒ ग्रामी । ग्राम्ये॑व । एव भ॑वति । भ॒व॒ति॒ सा॒ग्र॒ह॒णी । सा॒ग्र॒ह॒णी भ॑वति । सा॒ग्र॒ह॒णीति॑ सा॑-ग्र॒ह॒णी । भ॒व॒ति॒ म॒नो॒-ग्र॒ह॒णं । म॒नो॒ग॑हणं वै । म॒नो॒ग्र॒ह॒णमिति॑ मनः-ग॑हणं । वै सं॑ग्रह॒णं । सं॒ग्र॒ह॒णं मन॑ः । सं॒ग्र॒ह॒णमिति॑ सं-ग्र॒ह॒णं । मन॑ एव । एव सं॑जा॒ताना॑ँ । स॒जा॒ताना॑ँ गृह्णाति । स॒जा॒ता॒नामिति॑ स-जा॒ताना॑ँ ()

काण्ड -2, प्रपाठक -3, अनुवाक -9, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। गृ॒ह्णा॒ति॒ ध्रुवः । ध्रुवोऽसि । अ॒सि॒ ध्रुवः । ध्रुवोऽहं । अ॒हꣳ॒ सं॑जा॒तेषु॑ । स॒जा॒तेषु॑ भूयासं । स॒जा॒तेष्वितिस-जा॒तेषु॑ । भू॒या॒स मिति॑ । इति॑ परि॒धीन्॑ । प॒रि॒धीन्परि॑ । प॒रि॒धीनिति॑ परि-धीन् । परि॑ दधाति । द॒धा॒त्या॒शिष॑ँ । आ॒शिष॑मेव । आ॒शिष॒मित्या॑ँ- शिष॑ँ । ए॒वेताम् । ए॒तामा । आशा॑ँस्ते । शा॒स्ते॒था॑ँ । अथो॑ एतत् । अथो॒ इत्यथा॑ँ । ए॒तदे॒व । एव सर्व॑ँ । सर्वꣳ॒ सं॑जा॒तेषु॑ । स॒जा॒तेष॑धि । स॒जा॒तेष्वितिं स-जा॒तेषु॑ । अधि॑ भवति । भ॒व॒ति॒ यस्य॑ । यस्ये॒वं । एवं वि॒दुषः॑ । वि॒दुष॑ ए॒ते । ए॒ते प॑रि॒धय॑ः । प॒रि॒धय॑ः परिधी॒यंते॑ । प॒रि॒धय॒ इति॑ परि-धय॑ः । प॒रि॒धी॒यं॒त॒ आम॑नं । प॒रि॒धी॒यं॒त॒ इति॑ परि-धी॒यंते॑ । अम॑नमसि । आम॑न॒मित्या-म॒न॒ं । अ॒स्याम॑नस्य । आम॑नस्यदेवाः । आम॑न॒स्येत्या-म॒न॒स्य॒ । दे॒वा॒ इति॑ । इति॑ ति॒स्रः । ति॒स्र आहु॑तीः । आहु॑तीर्जुहोति । आहु॑ती॒रित्या-हु॒ती॒ः । जु॒हो॒त्ये॒ता॒व॑तः । ए॒ता॒व॑तो वै । वै सं॑जा॒ताः॒ । स॒जा॒ता

ये । स॒ज्ञा॒ता इति॑ स-ज्ञा॒ताः । ये म॒हान्त॑ः । म॒हान्तो॒ ये । ये क्षु॑ल्ल॒काः । क्षु॑ल्ल॒का याः । याःस्त्रिय॑ः । स्त्रिय॒स्तान् । तान्ने॒न । ए॒वाव॑ । अव॑रुन्धे । रु॒न्धे॒ ते । त एन॑ं । ए॒न॒मव॑- रुद्धाः । अव॑रुद्धा॒ उप॑ । अव॑रुद्धा॒ इत्यव॑-रुद्धाः । उप॑ तिष्ठते । ति॒ष्ठ॒त इति॑ तिष्ठते () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -10, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

यन्नव॑ं । नव॒मेत् । ऐत्तत् । तन्नव॑नीतं । नव॑नीत मभवत् । नव॑नीत॒मिति॒ नव॑-नीत॑ं । अ॒भ॒व॒द्यत् । यदस॑र्पत् । अस॑र्प॒त्तत् । तथ्सर्पिः । स॒र्पिर॑भवत् । अ॒भ॒व॒द्यत् । यदध्रि॑यत । अध्रि॑य॒त तत् । तद्धृ॑तं । घृ॒तम॑भवत् । अ॒भ॒व॒दश्वि॑नोः । अ॒श्वि॒नोः॑ प्रा॒णः । प्रा॒णोऽसि । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ तस्य॑ । तस्य॑ ते । ते॒ द॒त्ता॑ं । द॒त्ता॑ं ययोः॑ । ययोः॑ प्रा॒णः । प्रा॒णोऽसि॑ । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ स्वाहा॑ । स्वाहेंद्र॑स्य । इंद्र॑स्य प्रा॒णः । प्रा॒णोऽसि । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ तस्य॑ । तस्य॑ ते । ते॒ द॒दा॒तु॒ । द॒दा॒तु॒ यस्य॑ । यस्य॑ प्रा॒णः । प्रा॒णोऽसि॑ । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ स्वाहा॑ । स्वाहा॑ मि॒त्रावरु॑णयोः । मि॒त्रा-वरु॑णयोः प्रा॒णः । मि॒त्रावरु॑णयो॒रिति॑ मि॒त्रा-वरु॑णयोः । प्रा॒णोऽसि । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ तस्य॑ । तस्य॑ ते । ते॒ द॒त्ता॒म् । द॒त्ता॑ं ययोः॑ । ययोः॑ प्रा॒णः । प्रा॒णोऽसि॑ । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ स्वाहा॑ । स्वाहा॒ विश्वे॑षां । विश्वे॑षां दे॒वाना॑ं । दे॒वाना॑ं प्रा॒णः । प्रा॒णोऽसि । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ तस्य॑ ()

काण्ड -2, प्रपाठक -3, अनुवाक -10, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। तस्य॑ ते । ते॒ द॒दतु॒ । द॒दतु॒ येषा॑ं । येषा॑ं प्रा॒णः । प्रा॒णोऽसि॑ । प्रा॒ण इति॑ प्र-अ॒नः । अ॒सि॒ स्वाहा॑ । स्वाहा॑ घृ॒तस्य॑ । घृ॒तस्य॒ धारा॑ं । धारा॑म॒मृत॑स्य । अ॒मृत॑स्य पन्था॑म् । पन्था॒मिन्द्रे॑ण । इन्द्रे॑ण द॒त्ता॑ं । द॒त्ता॑ं प्रय॑ताम् । प्रय॑ता॑ं म॒रुद्भिः॑ । प्रय॑ता॒मिति॒ प्र-य॒ता॒म् । म॒रुद्भि॒रिति॑ म॒रुत्-भिः॑ ॥ तच्चा॑ं । च॒ा॒ विष्णुः॑ । विष्णु॒ परि॑ । पर्य॑पश्यत् । अ॒प॒श्य॒त्तत् । तच्चा॑ं ।

ब्रेडाँ । इडा गविं । गव्ये रंयत् । ऐरंयदित्यैरंयत् ॥ पावमानेनं ब्रा । ब्रा स्तोमेंन । स्तोमेंन गायत्रस्यं । गायतंस्य वर्तन्या । वर्तन्योपाꣳशोः । उपाꣳशो-र्वीर्येण । उपाꣳशोरित्युप-अꣳशोः । वीर्येण देवः । देवस्त्वाँ । ब्रासविता । सवितोत् । उथ्मृंजतु । सृजतु जीवातंवे । जीवातंवे जीवन-स्यायैं । जीवनस्यायैं बृहद्रथंतरयोः । बृहद्रथंतरयोंस्त्वा । बृहद्रथंतरयोरितिं बृहत्-रथंतरयोः । ब्रा स्तोमेंन । स्तोमेंन त्रिष्टुभः । त्रिष्टुभो वर्तन्या । वर्तन्याशुक्रस्यं । शुक्रस्यं वीर्येण । वीर्येण देवः । देवस्त्वाँ । ब्रा सविता । सवितोत् । उथ्मृंजतु ()

काण्ड -2, प्रपाठक -3, अनुवाक -10, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। सृजतु जीवातंवे । जीवातंवे जीवनस्यायैं । जीवनस्यायां अग्नेः । अग्नेस्त्वाँ । ब्रा मात्रंया । मात्रंया जगंत्यै । जगंत्यै वर्तन्या । वर्तन्याग्रंयणस्यं । आग्रयणस्यं वीर्येण । वीर्येण देवः । देवस्त्वाँ । ब्रा सविता । सवितोत् । उथ्संजतु । सृजतु जीवातंवे । जीवातंवे जीवनस्यायैं । जीवानस्यायां इमम् । इममंग्ने । अग्न आयुंषे । आयुंषे वर्चसे । वर्चसे कृधि । कृधि प्रियम् । प्रियꣳ रेतः । रेतो वरुण । वरुण सोम । सोम राजन्न् । राजन्नितिं राजन्न् ॥ मातेवं । इवास्मै । अस्मा अदिते । अदिते शर्मं । शर्मं यच्छ । यच्छ विश्वैं । विश्वे देवाः । देवा जरंदष्टिः । जरंदष्टिर्यथाँ । जरंदष्टिरितिं जरंत्- अष्टिः । यथासंत् । असदित्यसंत् ॥ अग्निरायुंष्मान् । आयुंष्मान्सः । स वनस्पतिंभिः । वनस्पतिंभिरायुंष्मान् । वनस्पतिंभिरितिवनस्पतिं-भिः । आयुंष्मान्तेनं । तेनं ब्रा । ब्रायुंषा । आयुषायुंष्मन्तं । आयुंष्मन्तं करोमि । करोमि सोमः । सोम आयुंष्मान् । अयुंष्मान्सः । स ओषंधीभिः । ओषंधीभिर्यज्ञः । ओषंधीभिरित्योषंधि-भिः । यज्ञ आयुंष्मान् । आयुंष्मान्सः । सदक्षिंणाभिः । दक्षिंणाभिर्ब्रह्मं । ब्रह्मायुंष्मत् । आयुंष्मत्तत् । तद्ब्राँह्मणैः । ब्राह्मणैरायुंष्मत् । आयुंष्म-देवाः । देवा आयुंष्मन्तः । आयुंष्मन्तस्ते । तेंऽमृतेंन । अमृतेंन पितरः । पितर आयुंष्मन्तः । आयुंष्मन्तस्ते । ते स्वधयाँ । स्वधयायुंष्मन्तः । स्वधयेतिं स्व-धयाँ । आयुंष्मन्तस्तेनं । तेनं ब्रा । ब्रायुंषा । आयुषायुंष्मन्तं । अयुंष्मन्तं करोमि । करोमीतिं करोमि () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

अग्निं वै । वा एतस्यं । एतस्य शरीरं । शरीरं गच्छति । गच्छति सोमँ । सोमꣳ रसः । रसो वरुंणः । वरुंण एनं । एनं वरुणपाशेनं । वरुणपाशेनं गृह्णाति । वरुणपाशेनेतिं वरुण-पाशेनं । गृह्णाति सरंस्वतीम् । सरंस्वतीं वाक् । वागग्नाविष्णूँ । अग्नाविष्णूं आत्मा । अग्नाविष्णू इत्यग्ना-विष्णूँ । आत्मायस्यं । यस्य ज्योक् । ज्योगामयंति । आमयंति यः । यो ज्योगांमयावी । ज्योगांमयावी स्यात् । ज्योगांमयावीति ज्योक्-आमयावी । स्याद्यः । यो वाँ । वा कामयेंत । कामयेंत सर्वँ । सर्वमायुः । आयुंरियाम् । इयामितिं । इति तस्मैँ । तस्मा एतां । एतामिष्टिँ । इष्टिं निः । निर्वपेत् । वपेदाग्नेयं । आग्नेयमष्टाकपालं । अष्टाकपालꣳ सौम्यं । अष्टाकपालꣳ मित्यष्टा-कपालं । सौम्यं चरुं । चरुं वारुणं । वारुणं दशंकपालं । दशंकपालꣳ सारस्वतं । दशंकपालꣳमितिदशं-कपालं । सारस्वतं चरुं । चरुमाँग्नावैष्णवं । आग्नावैष्णवमेकांदशकपालं । आग्नावैष्णनमित्याँग्ना- वैष्णवं । एकांदशकपालमग्नेः । एकांदशकपालꣳमित्येकांदश-कपालं । अग्नेरेव । एवास्यं । अस्य शरीरं । शरीरं निष्क्रीणातिं । निष्क्रीणाति सोमाँत् । निष्क्रीणातीतिं निः-क्रीणातिं । सोमादँसं ()

काण्ड -2, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। रसं वारुणेनं । वारुणेनेव । एवैनँ । एनं वरुणपाशात् । वरुणपाशान्मुंचति । वरुणपाशादितिं वरुण-पाशात् । मुंचति सारस्वतेनं । सारस्वतेन वाचँ । वाचं दधाति । दधात्यग्निः । अग्निस्सर्वाँः । सर्वा देवताँः । देवता विष्णुः । विष्णुर्यज्ञः । यज्ञो देवतांभिः । देवतांभिश्च । चैव । एवैनँ । एनं यज्ञेनं । यज्ञेनं च । च बिषज्यति । भिषज्यत्युत । उत यदिं । यदीतासुः । इतासुर्भवंति । इतासुरितीत-असुः । भवंति जीवंति । जीवंत्येव । एव यत् । यन्नवँ । नवमेत् । ऐत्तत् ।

तन्नवंनीतं । नवंनीत-मभवत् । नवंनीतमिति नवं-नीतम् । अभवदितिं । इत्याज्यँ । आज्यमवं । अवैँक्षते । ईक्षते रूपं । रूपमेव । एवास्यं । अस्येतत् । एतन्महिमानँ । महिमानं व्याचष्टे । व्याचष्टेऽश्विनोः । व्याचष्ट इतिं वि-आचष्टे । आश्विनोः प्राणः । प्राणोऽसि । प्राण इतिं प्र-अनः । असीतिं । इत्याह । आहाश्विनौ । आश्विनो वै । वै देवानाँ ()

काण्ड -2, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। देवानाँ भिषजौ । भिषजो ताभ्याँ । ताभ्यामेव । एवास्मैँ । अस्मे भेषजम् । भेषजं करोति । करोतींद्रस्य । इंद्रस्य प्राणः । प्राणोऽसि । प्राण इतिं प्र-अनः । असीतिं । इत्याह । आहेंद्रियम् । इंद्रिय मेव । एवास्मिन्नं् । अस्मिन्नेतेनं । एतेनं दधाति । दधाति मित्रावरुणयोः । मित्रावरुणयोः प्राणः । मित्रावरुणयोरितिं मित्रा-वरुणयोः । प्राणोऽसि । प्राण इतिं प्र-अनः । असीतिं । इत्याह । अह प्राणापानौ । प्राणापानावेव । प्राणापाना वितिं प्राण-अपानौ । एवास्मिन्नं् । अस्मिन्नेतेनं । एतेनं दधाति । दधाति विश्वेषां । विश्वेषां देवानाँ । देवानाँ प्राणः । प्राणोऽसि । प्राण इतिं प्र-अनः । असीतिं । इत्याह । आह वीर्यँ । वीर्यं मेव । एवास्मिन्नं् । अस्मि-न्नेतेनं । एतेनं दधाति । दधाति घृतस्यं । घृतस्य धाराँ । धारांममृतंस्य । अमृतंस्य पंथाँम् । पंथामितिं । इत्याह । आह यथायजुः । यथायजुरेव । यथायजुरितिं यथा-यजुः । एवैतत् । एतत्पावमानेनं । पावमानेनं ब्बा । ब्बा स्तोमेंन । स्तोमेनेतिं ()

काण्ड -2, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। इत्याह । अह प्राणं । प्राणमेव । प्राण मितिं प्र-अनं । एवास्मिन्नं् । अस्मिन्नेतेनं । एतेनं दधाति । दधाति बृहद्रथंत-रयोः । बृहद्रथंतरयौस्ब्बा । बृहद्रथंतरयोरितिं बृहत्-रथंतरयोः । ब्बा स्तोमेंन । स्तोमेनेतिं । इत्याह । आहौजः । ओजं एव । एवास्मिन्नं् । अस्मिन्नेतेनं । एतेनं दधाति । दधात्यग्नेः । अग्नेस्ब्बाँ । ब्बा मात्रया । मात्र- येतिं । इत्याह

। आहात्मानँ । आत्मानमेव । एवास्मिन्न् । अस्मितेनं । एतेनं दधाति । दधात्यृत्विजः । ऋत्विजः परिं । पर्याहुः । आहुर्यावंतः । यावंत एव । एवर्त्विजः । ऋत्विज स्ते । त एंनं । एनं भिषज्यंति । भिषज्यंति ब्रह्मणः । ब्रह्मणो हस्तँ । हस्तमन्वारभ्यं । अन्वारभ्यपरिं । अन्वारभ्येत्यनु-आरभ्यं । पर्याहुः । आहुरेकधा । एकधैव । एकधेत्येक-धा । एव यजमाने । यजमान आयुः । अयुर्दधति । दधति यत् । यदेव । एव तस्यं । तस्य तत् । तद्धिरण्यात् ()

काण्ड -2, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। हिरण्याद्धृतं । घृतं निः । निष्पिबति । पिबत्यायुः । आयुर्वै । वै घृतं । घृतममृतँ । अमृतꣳ हिरण्यं । हिरण्यममृतात्। अमृता- देव । एवायुः । आयुर्निः । निष्पिबति । पिबति शतमानं । शतमानं भवति । शतमानमितिं शत-मानं । भवति शतायुः । शतायुः पुरुषः । शतायुरितिं शत-आयुः । पुरुषश्चतेंद्रियः । शतेंद्रिय आयुषि । शतेंद्रिय इतिं शत-इंद्रियः । आयुष्येव । एवेंद्रिये । इंद्रिये प्रतिं । पति तिष्ठति । तिष्ठत्यथौ । अथो खलु । अथो इत्यथौ । खलु यावंतीः । यावंतीस्समाः । समा एष्यन्न् । एष्यन्मन्येत । मन्येत तावन्मानं । तावन्मानꣳ स्यात् । तावन्मान मिति तावत्-मानं । स्याथ्समृद्धै । समृद्ध्या इमं । समृध्या इति सं-ऋद्ध्यै । इम-मग्ने । अग्न आयुषे । आयुषे वर्चसे । वर्चसे कृधि । कृधीतिं । इत्याह । आहायुः । आयुरेव । एवास्मिन्न् । अस्मिन्वर्चः । वर्चो दधाति । दधाति विश्वै । विश्वे देवाः । देवा जरदष्टिः । जरदष्टिर्यथा । जरदष्टिरिति जरत्-अष्टिः । यथासत् । असदितिं । इत्याह । आह जरदष्टिं । जरदष्टिमेव । जरदष्टिमिति जरत्-अष्टिं । एवैनँ । एनं करोति । करोत्यग्निः । अग्निरायुष्मान् । आयुष्मानितिं । इति हस्तँ । हस्तं गृह्णाति । गृह्णात्येते । एते वै । वै देवाः । देवा आयुष्मन्तः । आयुष्मन्तस्ते । त एव । एवास्मिन्न् । अस्मिन्नायुः । आयुर्दधति । दधति सर्वं । सर्वमायुः । आयुरेति । एतीत्येति () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -12, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

प्रजापतिर्वरुणाय । प्रजापतिरिति प्रजा-पतिः । वरुणायाश्वँ । आश्वमनयत् । अनयथ्सः । स स्वाम् । स्वां देवताँ ।
देवतामार्छत् । आर्छथ्सः । सपरिं । पर्यदीर्यत । अदीर्यत सः । स एतम् । एतं वारुणं । वारुणं चतुष्कपालं ।
चतुष्कपालमपश्यत् । चतुष्कपालमिति चतुः-कपालं । अपश्यत्तं । तम् निः । निरवपत् । अवपत्ततः । ततो वै । वै
सः । सवरुण- पाशात् । वरुणपाशादमुच्यत । वरुणपाशादिति वरुण-पाशात् । अमुच्यत वरुणः । वरुणो वै । वा एतं
। एतं गृह्णाति । गृह्णाति यः । योऽश्वँ । अश्वं प्रतिगृह्णाति । प्रतिगृह्णाति यावतः । प्रतिगृह्णातीति प्रति-गृह्णाति ।
यावतोऽश्वान् । अश्वाँन्प्रतिगृह्णीयात् । प्रतिगृह्णीयात्तावतः । प्रतिगृह्णीयादिति प्रति-गृह्णीयात् । तावतो वारुणान् ।
वारुणांश्चतुष्कपालान् । चतुष्कपा-लान्निः । चतुष्कपालानिति चतुः-कपालान् । निर्वपेत् । वपेद्वरुणम् । वरुण मेव । एव
स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवैनँ । एनं
वरुण- पाशात् । वरुणपाशान्मुंचति । वरुणपाशादिति वरुण-पाशात् ()

काण्ड -2, प्रपाठक -3, अनुवाक -12, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। मुंचति चतुष्कपालाः । चतुष्कपाला भवंति । चतुष्कपाला इति चतुः-कपालाः । भवंति चतुष्पात् । चतुष्पाद्धि ।
चतुष्पादिति चतुः-पात् । ह्यश्वः । आश्वस्समृद्ध्यै । समृद्ध्या एकँ । समृद्ध्या इति सं-ऋद्ध्यै । एकमतिरिक्तं । अतिरिक्तं
निः । अतिरिक्त मित्यति-रिक्तं । निर्वपेत् । वपेद्यं । यमेव । एव प्रतिग्राही । प्रतिग्राही भवति । प्रतिग्राहीति प्रति-
ग्राही । भवति यं । यं वाँ । वा न । नाध्येति । अध्येति तस्माँत् । अध्येतीत्यधि-एति । तस्मादेव । एव वरुणपाशात्
। वरुणपाशा- न्मुच्यते । वरुणपाशादिति वरुण-पाशात् । मुच्यते यदिं । यदपरं । अपरं प्रतिग्राही । प्रतिग्राही स्यात् ।
प्रतिग्राहीति प्रति-ग्राही । स्याथ्सौर्यं । सौर्यमेक-कपालं । एककपालमनु । एककपालमित्येक-कपालं । अनु निः ।
निर्वपेत् । वपेदमुम् । अमुमेव । एवादित्यं । आदित्यमुच्चारं । उच्चारं कुरुते । उच्चारमित्युत्-चारं । कुरुतेऽपः ।

अपोऽवभृथं । अवभृथ मवं । अवभृथ मित्यव-भृथं । अवैति । एत्यप्सु । अप्सु वै । अप्स्वित्यप्-सु । वै वरुणः । वरुणस्साक्षात् । साक्षा देव । साक्षादिति स-अक्षात् । एव वरुणं । वरुणमवं । अवं यजते । यजतेऽपोनप्त्रीयँ । अपोनप्त्रीयं चरुं । अपोनप्त्रिय मित्यपः-नप्त्रीयँ । चरुं पुनः । पुनरेत्यं । एत्य निः । एत्येत्याँ-इत्यं । निर्वपेत् । वपेदप्सुयोनिः । अप्सुयोनि र्वै । अप्सुयोनिरित्यप्सु-योनिः । वा अश्वः । अश्वस्स्वां । स्वामेव । एवैनँ । एनं योनिँ । योनिं गमयति । गमयति सः । स एनं । एनꣳशान्तः । शान्त उपं । उपं तिष्ठते । तिष्ठत इतिं तिष्ठते () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -13, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

यावाँ । वामिंद्रावरुणा । इंद्रावरुणायतव्याँ । इंद्रा-वरुणेतीँद्रा-वरुणा । यतव्यांतनूः । तनूस्तयाँ । त येमम् । इममꣳहसः । अꣳहसो मुंचतं । मुंचतं या । यावाँ । वा मिंद्रावरुणा । इंद्रावरुणा सहस्याँ । इंद्रावरुणेतिँद्रा-वरुणा । सहस्यां रक्षस्याँ । रक्षस्याँ तेजस्याँ । तेजस्यां तनूः । तनूस्तया । तयेमम् । इममꣳहसः । अꣳहसो मुंचतं । मुंचतं यः । यो वाँ । वा मिंद्रावरुणो । इंद्रावरुणावग्नौ । इंद्रावरुणावितीँद्रा-वरुणो । अग्नौस्सामं । स्सामस्तं । तं वाँ । वामेतेनं । एतेनावं । अवं यजे । यजे यः । योवाँ । वामिंद्रावरुणा । इंद्रावरुणाद्विपाथ्सुं । इंद्रा-वरुणेतीँद्रा-वरुणा । द्विपाथ्सुं पशुषुं । द्विपात्स्विति द्विपात्-सु । पशुषु चतुष्पाथ्सु । चतुष्पाथ्सु गोष्ठे । चतुष्पात्स्विति चतुष्पात्-सु । गोष्ठे गृहेषुं । गोष्ठ इतिं गो-स्थे । गृहेष्वप्सु । अप्सोषधीषु । अप्स्वित्यं प्-सु । ओषधीषु वनस्पतिंषु । वनस्पतिंषु स्सामं । स्सामस्तं । तं वाँ । वा मेतेनं । एतेनावं । अवं यजे । यज इंद्रः । इंद्रो वै । वा एतस्यं ()

काण्ड -2, प्रपाठक -3, अनुवाक -13, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। एतस्यैँद्रियेण । इंद्रियेणापं । अपंक्रामति । क्रामति वरुंणः । वरुंण एनं । एनं वरुणपाशेनं । वरुणपाशेनं गृह्णाति । वरुणपाशेनेतिं वरुण-पाशेनं । गृह्णाति यः । यः पाप्मनाँ । पाप्मना गृहीतः । गृहीतो भवंति । भवंति यः । यः पाप्मनाँ । पाप्मना गृहीतः । गृहीत स्स्यात् । स्यात्तस्मैं । तस्मा एतां । एता मैँद्रावरुणीं । ऐंदावरुणीं पंयस्याँ । ऐंद्रावरुणीमित्यैँद्रा-वरुणीं । पयस्याँ निः । निर्वंपेत् । वपेदिंद्रः । इंद्र एव । एवास्मिन्न् । अस्मिन्निंद्रियं । इंद्रियं दंधाति । दधाति वरुंणः । वरुंण?एनं । एनं वरुणपाशात् । वरुणपाशान्मुंचति । वरुणपाशादितिं वरुण-पाशात् । मुंचति पयस्याँ । पयस्या भवति । भवति पयः । पयो हि । हि वै । वा एतस्माँत् । एतस्मादपक्रामंति । अपक्रामतंथ । अपक्रामतीत्यंप-क्रामंति । अथैषः । एष पाप्मनाँ । पाप्मना गृहीतः । गृहीतो यत् । यत्पंयस्याँ । पयस्या भवंति । भवंति पयः । पयं एव । एवास्मिन्न् । अस्मिन्तयाँ । तया दधाति । दधाति पयस्यांयाम् ()

काण्ड -2, प्रपाठक -3, अनुवाक -13, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। पयस्यांयां पुरोडाशँ । पुरोडाशमवं । अवं दधाति । दधात्यात्मन्वंतँ । आत्मन्वंतमेव । आत्मन्वंतमित्याँत्मन्-वंतँ । एवैनँ । एनं करोति । करोत्यथौं । अथो आयतंनवंतं । अथो इत्यथौं । आयतंनवंतमेव । आयतंनवंतमित्यायतंन-वंतं । एव चंतुर्धा । चतुर्धा वि । चतुर्धेतिं चतुः-धा । व्यूंहति । ऊहति दिक्षु । दिक्ष्वेंव । एव प्रतिं । प्रतिं तिष्ठति । तिष्ठति पुनः । पुनस्सं । समूंहति । ऊहति दिग्भ्यः । दि ग्भ्य एव । दि ग्भ्य इतिं दिक्-भ्यः । एवास्मैं । अस्मै भेषजम् । भेषजं करोति । करोति समूह्यं । समूह्यावं । समूह्येतिं सं-ऊह्यं । अवं द्यति । द्यति यथाँ । यथा विद्धं । आविद्धं निष्कृंततिं । आविद्धमित्या-विद्धम् । निष्कृंततिं तादृक् । निष्कृंततीतिं निः-कृंततिं । तादृगेव । एव तत् । तद्यः । यो वाँ । वा मिंद्रावरुणौ । इंद्रावरुणावग्नौ । इंद्रावरुणावितीँद्रा-वरुणौ । अग्नौ स्रामः । स्रामस्तं । तं वाँ । वामेतेनं । एतेनावं । अवं यजे । यजे इतिं । इत्याह । आह दुरिंष्टाः । दुरिंष्टा एव । दुरिंष्टा इति दुः-इष्टाः । एवैनँ । एनं पाति । पाति यः । यो वाँ । वा मिंद्रावरुणा । इंद्रावरुणा द्विपाथ्सुं । इंद्रावरुणेतीँद्रा-वरुणा । द्विपाथ्सुं पशुषुं ।

द्विपात्स्विति द्विपात्-सु । पशुषु स्रामः । स्रामस्तं । तं वाँ । वा मेतेन । एतेनाव । अव यजे । यज इति । इत्याह । आहेतावतीः । एतावतीर्वै । वा आपः । आप ओषधयः । ओषधयो वनस्पतयः । वनस्पतयः प्रजाः । प्रजाः पशवः । प्रजा इति प्र-जाः । पशव उपजीवनीयाँ । उपजीवनीयास्ताः । उपजीवनीया इत्युप-जीवनीयाँ । ता एव । एवास्मै । अस्मै वरुणपाशात् । वरुणपाशान्मुंचति । वरुणपाशादिति वरुण-पाशात् । मुंचतीति मुंचति () ॥॥

काण्ड -2, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

सप्रब्रवत् । प्रब्रवन्नि । प्रब्रवदिति प्रब्र-वत् । नि काव्याँ । काव्येंद्रँ । इंद्रं वः । वो विश्वतः । विश्वतस्परि । परींद्रँ । इंद्रं नरः । नर इति नरः ॥ ब्रह्मन् । नः सोम । सोम विश्वतः । विश्वतो रक्ष । रक्षाराजन् । राजन्नघायतः । अघायत इत्यघ-यतः ॥ न रिष्येत् । रिष्येत्त्वावतः । त्वावतस्सखाँ । त्वावत इति त्व-वतः । सखेति सखाँ ॥ या तैँ । ते धामानि । धामानि दिवि । दिवि या । या पृथिव्यां । पृथिव्यां या । या पर्वतेषु । पर्वतेष्वोषधीषु । ओषधीष्वप्सु । अप्स्वित्यप्-सु ॥ तेभिर्नः । नो विश्वैः । विश्वैस्सुमनाँ । सुमना अहेडन्न् । सुमना इति सु-मनाँ । अहेड त्राजन्न् । राजँन्त्सोम । सोमप्रति । पति हव्या । हव्या गृभाय । गृभायेति गृभाय ॥ अग्नीषोमा सवेदसा । अग्नीषोमेत्यग्नी-सोमा । सवेदसा सहूती । सवेद सेति स-वेदसा । सहूती वनतं । सहूती इति स-हूती । वनतं गिरः । गिर इति गिरः ॥ सं देवत्रा । देवत्रा बभूवथुः । देवत्रेति देव-त्रा । बभूवथुरिति बभूवथुः ॥ युवमेतानि ()

काण्ड -2, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। एतानि दिवि । दिवि रोचनानि । रोचनान्यग्निः । अग्निश्च । चसोम । सोम सक्रतू । सक्रतू अधत्तम् । सक्रतू इति स-क्रतू । अधत्त मित्यधत्तम् ॥ युवꣳ सिंधून् । सिंधूꣳरभिशस्तेः । अभिशस्तेरवद्यात् । अभिशस्तेरित्यभि-शस्तेः ।

अ॒व॒दा॒दग्नी॑षोमौ । अग्नी॑षोमा॒वमु॑चतं । अग्नी॑षोमा॒वित्यग्नी॑-सोमौ । अमु॑चतं गृभी॒तान् । गृ॒भी॒तानिति॑ गृभी॒तान् ॥ अग्नी॑षोमा वि॒मं । अग्नी॑षोमा॒वित्यग्नी॑-सोमौ । इ॒मꣳ सु । सु मे॑ । मे॒ शृ॒णु॒तं । शृ॒णु॒तं वृ॑षणा । वृ॒ष॒णा॒ हव॑म् । हव॒ मिति॒ हव॑म् ॥ प्रति॑ सू॒क्तानि॑ । सू॒क्तानि॑ हर्यतं । सू॒क्तानी॑ति सु-उ॒क्तानि॑ । ह॒र्य॒तं॒ भव॑तं । भव॑तं दा॒शुषे॑ । दा॒शुषे॑मयः । मय॒ इति॒ मयः॑ ॥ आन्यं । अ॒न्यं दि॒वः । दि॒वो मा॑त॒रिश्वा॑ । मा॒त॒रिश्वा॑ जभार । ज॒भा॒राम॑ग्नात् । अम॑ग्नादन्यं । अ॒न्यं परि॑ । परि॑ श्ये॒नः । श्ये॒नो अद्रेः॑ । अद्रे॒रित्यद्रेः॑ ॥ अग्नी॑षोमा॒ ब्रह्म॑णा । अग्नी॑षोमेत्यग्नी॑-सोमा । ब्रह्म॑णा वावृधाना । वा॒वृ॒धा॒नोरु॑ । उ॒रु य॒ज्ञाय॑ । य॒ज्ञाय॑ चक्रथुः । च॒क्र॒थु॒रु॒ उ॒लो॒कम् । लो॒कमिति॑ लो॒कम् ॥ अग्नी॑षोमाह॒विषः॑ । अग्नी॑षोमेत्यग्नी॑-सोमा । ह॒विषः॑ प॑स्थितस्य । प्रस्थि॑तस्यवी॒तम् । प्रस्थि॑त॒स्येति॒ प्र-स्थि॒त॒स्य॒ । वी॒तꣳह॑र्यतं ()

काण्ड -2, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

ह॒र्य॒तं॒ वृषणा । वृ॒ष॒णा॒ जु॒षे॒था॒म् । जु॒षे॒था॒ मिति॑ जुषेथाम् ॥ सु॒श॒र्मा॒णा॒ स्व॑वसा । सु॒श॒र्मा॒णेति॑ सु-श॒र्मा॒णा । स्व॑ वसा॒ हि । स्व॒व॒सेति॑ सु-अ॒व॒सा । हि भू॒तं । भू॒तम॑थ । अथा॑धत्तं । ध॒त्तं॒ यज॑-मानाय । यज॑मानाय॒ शं । शं योः । योरिति॒ योः ॥ आप्या॑यस्व । प्या॒य॒स्व॒ सं । सं ते॑ । त॒ इति॑ ते ॥ ग॒णाना॑म् त्वा । त्वा॒ ग॒ण॒प॑तिं । ग॒ण॒प॑तिꣳ हवामहे । ग॒ण॒प॑तिमिति॑ गण-पतिं । ह॒वा॒म॒हे॒ क॒विम् । क॒विं क॑वी॒नां । क॒वी॒नामु॑प-मश्र॑वस्तमं । उ॒प॒म॒श्र॑वस्तम॒मित्यु॑पमश्र॑वः-त॒म॒म् ॥ ज्येष्ठ॑राजं॒ ब्रह्म॑णां । ज्येष्ठ॑राज॒मिति॑ ज्येष्ठ-राज॑म् । ब्रह्म॑णां ब्रह्मणः । ब्र॒ह्म॒ण॒स्प॒ते॒ । प॒त॒ आ । अन॑ः । न॒श्शृ॒ण्वन् । शृ॒ण्वन्नू॒तिभिः॑ । ऊ॒तिभि॑स्सीद । ऊ॒तिभि॒रित्यू॒ति-भिः॒ । सी॒द॒ सा॒द॒नं । सा॒द॒न॒मिति॑ सा॒द॒नं ॥ स?इ॑त् । इ॒त्त्रने॑न । जने॑न॒ सः । स वि॒शा । वि॒शास॑ः । सज॑न्म॒ना । ज॒न्म॒ना सः । स पु॒त्रैः । पु॒त्रैर्वाज॑म् । वाज॑म् भरते । भ॒र॒ते॒ धना॑म् । धना॒ नृभिः॑ । नृ॒भि॒रिति॒ नृ-भिः॑ ॥ दे॒वाना॒ यः । यः पि॒त॒र॑म् । पि॒त॒र॒मा॒वि॒वा॑सति । आ॒वि॒वा॑सति श्र॒द्धाम॑नाः । आ॒वि॒वा॑स॒तीत्या॑-वि॒वा॑सति ()

काण्ड -2, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। श्रद्धामना हविषा । श्रद्धामना इति श्रद्धा-मनाः । हविषा ब्रह्मणः । ब्रह्मणस्पतिं । पतिमिति पतिं ॥ स सुष्टुभा । सुष्टुभा सः । सुष्टुभेति सु-स्तुभा । स ऋक्वता । ऋक्वता गणेन । गणेन वलम् । वलꣳ रुरोज । रुरोज फलिगं । फलिगꣳ रवेण । रवेणेति रवेण ॥ बृहस्पतिरुस्रियाः । उस्रिया हव्यसूदः । हव्यसूदः कनिक्रदत् । हव्यसूद इति हव्य-सूदः । कनिक्रदद्वावशतीः । वावशतीरुत् । उदाजत् । आजदित्याजत् ॥ मरुतो यत् । यद्ध । हवः । वो दिवः । दिवो या । या वः । वश्म१ । शर्मेति शर्म ॥ अर्यमायाति । आयाति । याति वृषभः । वृषभस्तुविष्मान् । तुविष्मान्दाता । दाता वसूनां । वसूनां पुरुहूतः । पुरुहूतो अरहन् । पुरुहूत इति पुरु-हूतः । अर्हन्नित्यरहन् ॥ सहस्राक्षो गोत्रभित् । सहस्राक्ष इति सहस्र-अक्षः । गोत्रभिद्वज्रबाहुः । गोत्रभिदिति गोत्र-भित् । वज्रबाहुरस्मासु । वज्रबाहुरिति वज्र-बाहुः । अस्मासु देवः । देवो द्रविणं । द्रविणं दधातु । दधाबिति दधातु ॥ ये तै । तेर्यमन् । अर्यमन्बहवः । बहवो देवयानाः । देवयानाः पंथानः । देवयाना इति देव-यानाः । पंथानो राजन् ()

काण्ड -2, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। राजन्दिवः । दिव आचरति । अचरन्तीत्या-चरन्ति ॥ तेभिर्नः । नो देव । देव महि । महि शर्म । शर्म यच्छ । यच्छ शं । शं नः । न एधि । एधि द्विपदै । द्विपदे शं । द्विपद इति द्वि-पदै । शं चतुष्पदे । चतुष्पद इति चतुः-पदे ॥ बुध्नादग्र । अग्रमगिरोभिः । अंगिरोभिर्गृणानः । अंगिरोभिरित्यंगिरः-भिः । गृणानो वि । वि पर्वतस्य । पर्वतस्य दृꣳहितानि । दृꣳहिता न्यैरत् । ऐरदित्यैरत् ॥ रुजद्रोधांꣳसि । रोधांꣳसि कृत्रिमाणि । कृत्रिमाण्येषां । एषाꣳ सोमस्य । सोमस्य ता । तामदै । मद इंद्रः । इंद्रश्चकार । चकारेति चकार ॥ बुध्नादग्रेण । अग्रेण वि । वि मिमाय । मिमाय मानैः । मानैर्वज्रेण । वज्रेण खानि । खान्यतृणत् । अतृणन्नदीनां । नदीनामिति नदीनां ॥ वृथा-सृजत् ।

असृजत्पथिभिः । पथिभिर्धीर्घयाथेः । पथिभिरिति पथि-भिः । धीर्घयाथेस्सोमस्य । धीर्घयाथेरिति धीर्घ-याथेः । सोमस्य ता । ता मदे । मद इंद्रः । इंद्रश्चकार । चकारेति चकार ()

काण्ड -2, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। प्रयः । यो जज्ञे । जज्ञे विद्वान् । विद्वाꣳ अस्य । अस्य बंधुं । बंधुं विश्वानि । विश्वानि देवः । देवो जनिमा । जनिमा विवक्ति । विवक्तीति विवक्ति ॥ बह्म ब्रह्मणः । ब्रह्मण उत् । उज्भार । जभार मध्यात् । मध्यान्नीचा । नीचादुच्चा । उच्चा स्वधया । स्वधयाभि । स्वधयेति स्व-धया । अभि प्र । प्र तस्थौ । तस्थाविति तस्थौ ॥ महान्मही । मही अस्तभायत् । मही इति मही । अस्तभायद्वि । वि जातः । जातोद्यां । द्याꣳ सद्म । सद्म पार्थिवं । पार्थिवं च । च रजः । रज इति रजः ॥ सबुध्नात् । बुध्नादाष्ट । आष्ट जनुषा । जनुषा भि । अभ्यग्रं । अग्रं बृहस्पतिः । बृहस्पतिं देवता । देवता यस्य । यस्य सम्राट् । सम्राडिति सं-राट् ॥ बुध्नादाः । यो अग्रं । अग्रमभ्यर्ति । अभ्यर्त्योजसा । अभ्यर्तीत्यभि- अर्ति । ओजसा बृहस्पतिं । बृहस्पति मा । आ विवासति । विवासति देवाः । देवा इति देवाः ॥ भिनद्बलं । वलं वि । वि पुरः । पुरो दर्दरीति । दर्दरीति कनिक्रकत् । कनिक्रदथ्सुवः । सुवरपः । अपो जिगाय । जिगायेति जिगाय () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

॥ इति द्वितीयकांडे तृतीयप्रश्नस्य क्रमपाठः समाप्तः ॥ क्रमपाठः देवा मनुष्याः । मनुष्याः पितरः । पितरस्ते । तेन्यतः । अन्यत आसन् । आसन्न सुराः । असुरा रक्षाꣳसि । रक्षाꣳसि पिशाचाः । पिशाचास्ते । तेन्यतः । अन्यत स्तेषां । तेषां देवानां । देवानामुत । उत यत् । यदल्पं । अल्पं लोहितं । लोहितमकुर्वन् । अकुर्वन्तत् । तद्रक्षाꣳसि ।

रक्षा꣡ꣳसि꣣ रात्री꣡भिः । रात्री꣡भिरसुभ्नन् । रात्री꣡भिरिति रात्रि꣡-भिः । अ꣣सुभ्नन्तान् । तान्थ्सुब्धान् । सुब्धान्मृतान् । मृतान꣣भि । अ꣣भि वि । व्यौ꣡च्छत् । औ꣡च्छत्ते । ते दे꣣वाः । दे꣣वा अवि꣡दुः । अ꣣वि꣡दुर्यः । यो वै । वै नः꣡ । नो꣣यं । अ꣣यं म्रि꣡यते꣡ । म्रि꣣यते रक्षा꣡ꣳसि । रक्षा꣡ꣳसि꣣ वै । वा इ꣣मं । इ꣣मं घ्नं꣡ति । घ्नं꣡तीति꣡ । इति꣣ ते । ते रक्षा꣡ꣳसि । रक्षाꣳस्युप꣡ । उपा꣡मंत्रयंत । अ꣣मंत्रयंत ता꣡नि꣡ । तान्य꣡ब्रुवन् । अ꣣ब्रुवन्वर꣡ं । वर꣡ं वृणामहै । वृ꣣णामहै यत् ()

काण्ड -2, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। यदसु꣡रान् । असु꣡राञ्जयाम । जया꣡मतत् । तन्नः꣡ । नस्सह꣡ । स꣡हासत् । अ꣣स꣡दि꣡ति꣡ । इति꣣ ततः꣡ । तत꣡ो वै । वै दे꣣वाः । दे꣣वा असु꣡रान् । असु꣡रानजयन् । अ꣣जयन्ते । तेऽसु꣡रान् । असु꣡राञ्जिबा । जि꣣बा रक्षा꣡ꣳसि । रक्षाꣳस्यप꣡ । अपा꣡नुदंत । अ꣣नुदंत ता꣡नि꣡ । तानि꣣ रक्षा꣡ꣳसि । रक्षाꣳस्यनृ꣡तं । अनृ꣡तमकर्त । अ꣣कर्तेति꣡ । इति꣡ सम꣡ंतं । स꣣मंतं दे꣣वान् । स꣣मंतमिति꣡ सं-अ꣡ंतं । दे꣣वान्परि꣡ । पर्या꣡विशन् । अ꣣विशन्ते । ते दे꣣वाः । दे꣣वा अग्नौ꣡ । अ꣣ग्नावना꣡थंत । अ꣣ना꣡थंत ते । ते꣡ऽग्नये꣡ । अ꣣ग्नये प्रव꣡ते । प्रव꣡ते पुरो꣡डाशं꣡ । प्रव꣡त इति꣣ प्र-व꣡ते । पुरो꣡डाशम꣡ष्टाकपालं । अ꣣ष्टकपालं निः । अ꣣ष्टकपालमित्यष्टा-कपालं । निरव꣡पन् । अ꣣वपन्नग्नये꣡ । अ꣣ग्नये विबा꣡धवते । वि꣣बा꣡धवते꣡ऽग्नये꣡ । वि꣣बा꣡धवत इति꣡ विबा꣡ध-वते । अ꣣ग्नये प्रती꣡कवते । प्रती꣡कवते यत् । प्रती꣡कवत इति प्रती꣡क-वते । यदग्नये꣡ । अ꣣ग्नये प्रव꣡ते । प्रव꣡ते नि꣣रव꣡पन् । प्रव꣡त इति प्र-व꣡ते । नि꣣रव꣡पन्, यानि꣡ । नि꣣रव꣡पन्नितिं निः-अव꣡पन् । यान्येव । एव पुरस्ता꣡त् । पुरस्ता꣣द्रक्षा꣡ꣳसि ()

काण्ड -2, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। रक्षाꣳ- स्यासन्न् । आस꣣न्तानि꣡ । तानि꣣ तेन꣡ । तेन꣣ प्र । प्राणु꣡दंत । अ꣣नुदंत यत् । यदग्नये꣡ । अ꣣ग्नये विबा꣡धवते । वि꣣बा꣡धवते यानि꣡ । वि꣣बा꣡धवत इति꣡ विबा꣡ध-वते । यान्येव । एवाभितः꣡ । अ꣣भितो रक्षा꣡ꣳसि । रक्षाꣳस्यासन्न् । आस꣣न्तानि꣡

। तानि॒ तेन॑ । तेन॒ वि । व्य॑बाधत । अ॒बा॒ध॒त॒ यत् । यद॒ग्नये॑ । अ॒ग्नये॑ प्रती॑कवते । प्रती॑कवते॒ यानि॑ । प्रती॑कव॒त॒ इ॒ति॒ प्रती॑क-व॒ते॒ । यान्ये॑व । ए॒व प॒श्चात् । प॒श्चाद्रक्षा॑ꣳसि । रक्षा॑ꣳस्यासन्न् । आस॒न्तानि॑ । तानि॒ तेन॑ । तेनाप॑ । अपा॑नुदत । अ॒नु॒द॒त॒ ततः॑ । ततो॑ दे॒वाः । दे॒वा अ॑भवन् । अ॒भ॒व॒न्परा॑ । परासु॑राः । असु॑रा यः । यो भ्रातृ॑व्यवान् । भ्रातृ॑व्यवा॒न्थ्स्यात् । भ्रातृ॑व्यवा॒नि॒ति॒ भ्रातृ॑व्य-वान् । स्याथ्सः । स-स्पर्ध॑मानः । स्पर्ध॑मान ए॒तया॑ । ए॒तयेष्टा॑ । इ॒ष्टा॑ यजेत । य॒जे॒ता॒ग्नये॑ । अ॒ग्नये॑ प॑वते । प्रव॑ते पु॒रो॒डाश॑ । प्रव॑त॒ इ॒ति॒ प्र-व॒ते॒ । पु॒रो॒डाश॑म॒ष्टाक॑पालं । अ॒ष्टाक॑पाल॒ निः । अ॒ष्टाक॑पाल॒मित्य॒ष्टा-क॒पा॒ल॒ । निर्व॑पेत् । व॒पे॒द॒ग्नये॑ । अ॒ग्नये॑ विबा॒धव॑ते । वि॒बा॒धव॑ते॒ऽग्नये॑ ()

काण्ड -2, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। वि॒बा॒ध व॑त॒ इ॒ति॑ विबा॒ध-व॒ते॒ । अ॒ग्नये॑ प्रती॑कवते । प्रती॑कवते॒ यत् । प्रती॑कव॒त॒ इ॒ति॒ प्रती॑क-व॒ते॒ । यद॒ग्नये॑ । अ॒ग्नये॑ प्रव॑ते । प्रव॑ते नि॒र्व॑पति । प्रव॑त॒ इ॒ति॒ प्र-व॒ते॒ । नि॒र्व॑पति॒ यः । नि॒र्व॒प॒ती॒ति॑ निः-व॑पति । य ए॒व । ए॒वास्मा॑त् । अ॒स्मा॒च्छ्रेया॑न् । श्रेया॒न्भ्रातृ॑व्यः । भ्रातृ॑व्य॒स्तं । तं तेन॑ । तेन॒ प्र । प्र॒णु॒द॒ते । नु॒द॒ते॒ यत् । यद॒ग्नये॑ । अ॒ग्नये॑ विभा॒धव॑ते । वि॒बा॒धव॑ते॒ यः । वि॒बा॒धव॑त॒ इ॒ति॑ विबा॒ध-व॒ते॒ । य ए॒व । ए॒वैने॑न । ए॒ने॒न॒ सदृ॑ङ् । सदृ॑ङ्ङ् । सदृ॑ङ्ङिति॑ स-दृ॒ङ् । तं तेन॑ । तेन॒ वि । विबा॑धते । बा॒ध॒ते॒ यत् । यद॒ग्नये॑ । अ॒ग्नये॑ प्रती॑कवते । प्रती॑कवते॒ यः । प्रती॑कव॒त॒ इ॒ति॒ प्रती॑क-व॒ते॒ । य ए॒व । ए॒वास्मा॑त् । अ॒स्मा॒त्पापी॑यान् । पापी॑या॒न्त॒ । तं तेन॑ । तेनाप॑ । अप॑नुदते । नु॒द॒ते॒ प्र । प्रश्रेया॑ꣳसं । श्रेया॑ꣳसं भ्रातृ॑व्यं । भ्रातृ॑व्यं नुदते । नु॒द॒तेऽति॑ । अति॑ सदृ॑श॑ । सदृ॑श॒ क्रामति । क्रा॒म॒ति॒न । नैन॑ । ए॒न॒ पापी॑यान् । पापी॑या-नाप्नोति । आ॒प्नो॒ति॒ यः । य ए॒व । ए॒व॒ विद्वान् । वि॒द्वा॒नेत॑या । ए॒त॒येष्टा॑ । इ॒ष्टा॒ यज॑ते । यज॑त॒ इ॒ति॒ यज॑ते () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

देवासुरास्संयत्ताः । देवासुरा इति देव-असुराः । संयत्ता आसन् । संयत्ता इति सं-यत्ताः । आसन्ते । ते देवाः । देवा अब्रुवन् । अब्रुवन्, यः । यो नः । नो वीर्यावत्तमः । वीर्यावत्तमस्तं । वीर्यावत्तम इति वीर्यावत्-तमः । तमनु । अनु समारभामहै । समारभामहा इति । समारभामहा इति सं-आरभामहै । इति ते । त इंद्रँ । इंद्रमब्रुवन् । अब्रुवन्त्वं । त्वं वै । वै नः । नो वीर्यावत्तमः । वीर्यावत्त- मोऽसि ।वीर्यावत्तम इति वीर्यावत्-तमः । असि त्वां । त्वामनु । अनु समारभामहै । समारभामहा इति । समारभामहा इति सं-आरभामहै । इति सः । सोऽब्रवीत् । अब्रवीत्तिस्रः । त्रिसो मँ । म इमाः । इमास्तनुवः । तनुवो वीर्यावतीः । वीर्यावतीस्ताः । वीर्यावतीरिति वीर्य-वतीः । ताः प्रीणीत । प्रीणीताथ । अथासुरान् । असुरानभि । अभि भविष्यथ । भविष्यथेति । इति ताः । ता वै । वै ब्रूहि । ब्रूहीति । इत्यब्रुवन् । अब्रुवन्नियं । इयमꣳ होमुक् । अꣳहोमुगियं । अꣳहोमुगित्यꣳहः-मुक् । इयं विमृधा । विमृधे यं । विमृधेति वि-मृधा । इयमिंद्रियावती । इंद्रियावतीति । इंद्रियावती तींद्रिय-वती ()

काण्ड -2, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। इत्यब्रवीत् । अब्रवीत्ते । त इंद्राय । इंद्रायाꣳ होमुचे । अꣳहोमुचे पुरोडाशँ । अꣳहोमुच इत्यꣳहः-मुचे । पुरोडाशमेकादशकपालं । एकादशकपालं निः । एकादशकपालमित्येकादश-कपालं । निरवपन् । अवपन्निंद्राय । इंद्रायवैमृधाय । वैमृधा-येंद्राय । इंद्रायेंद्रियावते । इंद्रियावते यत् । इंद्रियावत इतींद्रिय-वते । यदिंद्राय । इंद्रायाꣳ होमुचे । अꣳहोमुचे निरवपन् । अꣳहोमुच इत्यꣳहः-मुचे । निरवपन्नꣳहसः । निरवपन्नितिनिः-अवपन् । अꣳहस एव । एव तेन । तेनामुच्यत । अमुच्यत यत् । यदिंद्राय । इंद्राय वैमृधाय । वैमृधाय मृधः । मृध एव । एव तेन । तेनाप । अपाघ्नत । अघ्नत यत् । यदिंद्राय । इंद्रायेंद्रियावते । इंद्रियावत इंद्रियं । इंद्रियावत इतींद्रिय-वते । इंद्रियमेव । एव तेन । तेनात्मन् । आत्मन्नदधत । अदधत त्रयस्त्रिꣳशत्कपालं । त्रयस्त्रिꣳश-त्कपालं पुरोडाशँ । त्रयस्त्रिꣳशत्कपालमिति त्रयस्त्रिꣳशत्-कपालं । पुरोडाशं निः । निरवपन् । अवपन्त्रयस्त्रिꣳशत् । त्रयस्त्रिꣳशद्वै ।

त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत् । वै देवताः । देवतास्ताः । ता इंद्रः । इंद्र आत्मन् । आत्मन्ननु । अनु समारभत । समारभत भूत्यै । समारभयतेति सं-आरभत ()

काण्ड -2, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। भूत्यै तां । तां वाव । वाव देवाः । देवा विजितिं । विजितिमुत्तमाम् । विजितिमिति वि-जितिं । उत्तमामसुरैः । उत्तमामित्युत्-तमाम् । असुरैर्वि । व्यजयंत । अजयंत यः । यो भ्रातृव्यवान् । भ्रातृव्यवान्थ्स्यात् । भ्रातृव्यवानिति भ्रातृव्य-वान् । स्याथ्सः । स स्पर्धमानः । स्पर्धमान एतयाँ । एतयेष्टाँ । इष्टा यजेत । यजेतेंद्राय । इंद्रायाꣳहोमुचै । अꣳहोमुचे पुरोडाशँ । अꣳहोमुच इत्यꣳहः-मुचै । पुरोडाशमेकादशकपालं । एकादशकपालं निः । एकादशकपालमित्येकादश-कपालं । निर्वपेत् । वपेदिंद्राय । इंद्राय वैमृधाय । वैमृधायेंद्राय । इंद्रायेंद्रियावते । इंद्रियावतेऽꣳ हंसा । इंद्रियावत इतींद्रिय-वते । अꣳहंसा वै । वा एषः । एष गृहीतः । गृहीतो यस्माँत् । यस्माच्छ्रेयान् । श्रेयान्भ्रातृव्यः । भ्रातृव्यो यत् । यदिंद्राय । इंद्रायाꣳ होमुचै । अꣳ होमुचे निर्वपति । अꣳहोमुच इत्यꣳहः-मुचै । निर्वपत्यꣳहंसः । निर्वपतीति निः-वपति । अꣳहंस एव । एव तेन । तेन मुच्यते । मुच्यते मृधा । मृधा वै । वा एषः । एषोऽभिषंण्णः । अभिषंण्णो यस्माँत् । अभिषंण्ण इत्यभि-सन्नः । यस्माँथ्समानेषु । समानेष्वन्यः । अन्यःश्रेयान् । श्रेयानुत ()

काण्ड -2, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। उताभ्रातृव्यः । अभ्रातृव्यो यत् । यदिंद्राय । इंद्राय वैमृधाय । वैमृधाय मृधः । मृध एव । एव तेन । तेनापं । अपं हते । हते यत् । यदिंद्राय । इंद्रायेंद्रियावते । इंद्रियावत इंद्रियम् । इंद्रियावत इतींद्रिय-वते । इंद्रियमेव । एव

तेन॑ । तेनात्मन् । आ॒त्मन्ध॑त्ते । ध॒त्ते त्रय॑स्त्रिꣳशत्कपालं । त्रय॑स्त्रिꣳशत्कपालं पुरो॒डाश॑ं । त्रय॑स्त्रिꣳशत्कपाल॒मिति॒ त्रय॑स्त्रिꣳशत्-क॒पाल॑ं । पुरो॒डाश॒ं निः । निर्व॑पति । व॒प॒ति॒ त्रय॑स्त्रिꣳशत् । त्रय॑स्त्रिꣳश॒ द्वे । त्रय॑स्त्रिꣳश॒दिति॒ त्रय॑ः-त्रिꣳश॒त् । वै दे॒वता॑ः । दे॒वता॒स्ताः । ता ए॒व । ए॒व यज॑मानः । यज॑मान आ॒त्मन्न् । आ॒त्मन्न॑नु॑ । अनु॑ स॒मार॑भयते । स॒मार॑भयते भू॒त्यै॑ । स॒मार॑भयत॒ इति॑ सं-आर॑भयते । भू॒त्यै॒ सा । सा वै । वा ए॒षा । ए॒षा विजि॑तिः । विजि॑ति॒र्नाम॑ । विजि॑ति॒रिति॒ वि-जि॒ति॒ः । नामेष्टि॑ः । इ॒ष्टि॒र्यः । य ए॒वं । ए॒वं वि॒द्वान् । वि॒द्वान्ए॒तया॑ । ए॒तयेष्ट्या॑ । इ॒ष्ट्या॒ यज॑ते । यज॑त उत्त॒माम् । उ॒त्त॒मामे॒व । उ॒त्त॒मामित्यु॑त्-त॒माम् । ए॒व विजि॑तं । विजि॑तिं॒ भ्रातृ॑व्येण । विजि॑ति॒मिति॒ वि-जि॒ति॒ं । भ्रातृ॑व्येण॒ वि । विज॑यते । ज॒य॒त॒ इति॑ जयते () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

दे॒वासु॒रास्संय॑त्ताः । दे॒वासु॒रा इति॑ देव-अ॒सु॒राः । संय॑त्ता आसन्न् । संय॑त्ता॒ इति॒ सं-य॒त्ता॒ः । आ॒स॒न्ते षा॑ं । तेषा॑ं गायत्री । गा॒य॒त्र्योज॑ः । ओजो॒ बल॑ं । बल॑मिंद्रि॒यं । इ॒न्द्रि॒यं वी॒र्यं॑ । वी॒र्यं॑ प्र॒जां । प्र॒जां प॒शून् । प्र॒जामिति॑ प्र-जाम् । प॒शून्थ्स॑ंगृह्य॑ । स॒ंगृ॒ह्यादाय॑ । स॒ंगृ॒ह्येति॑ सं-गृ॒ह्य॑ । आ॒दाया॑पक्रम्य॑ । आ॒दाये॒त्या॑-दाय॑ । अ॒प॒क्रम्या॑तिष्ठत् । अ॒प॒क्रम्ये॒त्य॑प-क्रम्य॑ । अ॒ति॒ष्ठ॒त्ते॒ । ते॑ऽमन्यन्त । अ॒म॒न्य॒न्त॒ य॒तरान् । य॒तरान्, वै । वा इ॒यम् । इ॒यमु॑पाव॒र्थ्स्यति॑ । उ॒पा॒व॒र्थ्स्यति॒ ते । उ॒पा॒व॒र्थ्स्य॒तीत्यु॑प-आ॒व॒र्थ्स्यति॑ । त इ॒दं । इ॒दं भ॑विष्यति । भ॒वि॒ष्य॒तीति॑ । इति॒ तां । तां वि । व्य॑ह्वयंत । अ॒ह्व॒यं॒त॒-विश्व॑कर्मन्न् । विश्व॑कर्म॒न्निति॑ । विश्व॑कर्म॒न्निति॒ विश्व॑-क॒र्म॒न्न् । इति॑ दे॒वाः । दे॒वा दाभि॑ । दाभी॑ति॑ । इत्यसु॑राः । असु॑रास्सा । सा न । नान्य॑तरान् । अ॒न्य॒त॒रा॒श्च॒ न । च॒ नोपाव॑र्तत । उ॒पाव॑र्तत॒ ते । उ॒पाव॑र्त॒तेत्यु॑प-आव॑र्तत । ते दे॒वाः । दे॒वा ए॒तत् । ए॒तद्यजु॑ः । यजु॑रपश्यन्न् । अ॒प॒श्य॒न्नोज॑ः । ओजो॑ऽसि । अ॒सि॒ सह॑ः । सहो॑ऽसि । अ॒सि॒ बल॑ं । बल॑मसि ()

काण्ड -2, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। अ॒सि॒ भ्राज॑ः । भ्राजो॑ऽसि । अ॒सि॒ दे॒वाना॑म् । दे॒वाना॑ धाम॑ । धाम॒ नाम॑ । नामा॑ऽसि । अ॒सि॒ विश्व॑म् । विश्व॑मसि । अ॒सि॒ वि॒श्वायु॑ः । वि॒श्वायु॒स्सव॑म् । वि॒श्वायु॒रिति॑ वि॒श्व-आयु॑ः । सर्व॑मसि । अ॒सि॒ स॒र्वायु॑ः । स॒र्वायु॒रभि॒भूः । स॒र्वायु॒रिति॑ स॒र्व-आयु॑ः । अ॒भि॒भूरिति॑ । अ॒भि॒भूरित्य॑भि- भूः । इति॒ वाव । वाव दे॒वाः । दे॒वा अ॑सु॒राणाम् । अ॒सु॒राणा॒मोज॑ः । ओजो॒ बल॑म् । बल॑मिंद्रि॒यं । इं॒द्रि॒यं वी॒र्य॑म् । वी॒र्य॑ प्र॒जां । प्र॒जां प॒शून् । प्र॒जामिति॑ प्र-जाम् । प॒शून॑वृञ्जत । अ॒वृ॒ञ्ज॒त यत् । यद्गा॑य॒त्री । गा॒य॒त्र्य॑पक्रम्य॑ । अ॒प॒क्रम्यातिष्ठत् । अ॒प॒क्रम्येत्य॑प-क्रम्य॑ । अति॑ष्ठ॒त्तस्मा॑त् । तस्मा॑दे॒तां । ए॒तां गा॑य॒त्री । गा॒य॒त्रीति॑ । इ॒तीष्टि॑म् । इष्टि॑माहुः । आ॒हु॒ स्स्॒व॒त्स॒रः । स॒व॒त्स॒रो वै । स॒व॒त्स॒र इति॑ सं-व॒त्स॒रः । वै गा॑य॒त्री । गा॒य॒त्री स॑ंव॒त्स॒रः । स॒व॒त्स॒रो वै । स॒व॒त्स॒र इति॑ सं-व॒त्स॒रः । वै तत् । तद॑पक्रम्य॑ । अ॒प॒क्रम्या॑ तिष्ठत् । अ॒प॒क्रम्येत्य॑प-क॑म्य । अ॒ति॒ष्ठ॒द्यत् । यदे॒तया॑ । ए॒तया॑ दे॒वाः । दे॒वा अ॑सु॒राणाम् । अ॒सु॒राणा॒मोज॑ः । ओजो॒ बल॑म् । बल॑मिंद्रि॒यं । इं॒द्रि॒यं वी॒र्य॑म्

()

काण्ड -2, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। वी॒र्य॑ प्र॒जां । प्र॒जां प॒शून् । प्र॒जामिति॑ प्र-जाम् । प॒शून॑वृञ्जत । अ॒वृ॒ञ्ज॒त तस्मा॑त् । तस्मा॑दे॒तां । ए॒ताꣳ सं॑व॒र्गः । सं॒व॒र्ग इति॑ । सं॒व॒र्ग इति॑ सं-व॒र्गः । इ॒तीष्टि॑म् । इष्टि॑माहुः । आ॒हु॒र्यः । यो भ्रातृ॑व्यवान् । भ्रातृ॑व्यवा॒न्थ्स्यात् । भ्रातृ॑व्यवा॒नि॒ति॒ भ्रातृ॑व्य-वा॒न् । स्याथ्सः । स स्पर्ध॑मानः । स्पर्ध॑मान ए॒तया॑ । ए॒तयेष्टया॑ । इष्टया॑ यजेत । य॒जे॒ताग्नये॑ । अ॒ग्नये॑ सं॒व॒र्गाय॑ । सं॒व॒र्गाय॑ पुरो॒डाश॑म् । सं॒व॒र्गायेति॑ सं-व॒र्गाय॑ । पु॒रो॒डाश॑म॒ष्टाक॑पालं । अ॒ष्टाक॑पालं निः । अ॒ष्टाक॑पाल॒मित्य॒ष्टा-क॒पा॒लं । निर्व॑पेत् । व॒पे॒त्तं । तꣳ श्रृ॒तं । श्रृ॒तमास॑न्नम् । आस॑न्न॒मेते॑न । आस॑न्न॒मित्या_सन्न॑ । ए॒ते॒न य॒जु॒षा । य॒जु॒षाभि । अ॒भिमृ॑शेत् । मृ॒शे॒दोज॑ः । ओज॑ ए॒व । ए॒व बल॑म् । बल॑मिंद्रि॒यं । इं॒द्रि॒यं वी॒र्य॑म् । वी॒र्य॑ प्र॒जां ।

प्रजां पशून् । प्रजामिति प्र-जां । पशून्भ्रातृव्यस्य । भ्रातृव्यस्य वृङ्क्ते । वृङ्क्ते भवति । भवत्यात्मना । आत्मनापरा । परास्य । अस्य भ्रातृव्यः । भ्रातृव्यो भवति । भवतीति भवति () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

प्रजापतिः प्रजाः । प्रजापति रिति प्रजा-पतिः । प्रजा असृजत । प्रजा इति प्र-जाः । असृजत ताः । ता अस्मात् । अस्माथ्सृष्टाः । सृष्टाः पराचीः । पराचीरायन्न् । आयन्ताः । ता यत्र । यतावसन्न् । अवसन्ततः । ततो गर्मुत् । गर्मुदुत् । उदतिष्ठत् । अतिष्ठत्ताः । ता बृहस्पतिः । बृहस्पतिश्च । चान्ववैतां । अन्ववैताꣳ सः । अन्ववैतामित्यनु-अवैताम् । सोऽब्रवीत् । अब्रवीद्बृहस्पतिः । बृहस्पतिरनया । अनया ब्बा । ब्बा प्र । प्रतिष्ठानि । तिष्ठान्यथ । अथ ब्बा । ब्बा प्रजाः । प्रजा उपावर्थ्स्यन्ति । प्रजा इति प्र-जाः । उपावर्थ्स्य-न्तीति । उपावर्थ्स्यन्तीत्युप-आवर्थ्स्यन्ति । इति तं । तं प्र । प्रातिष्ठत् । अतिष्ठत्ततः । ततो वै । वै प्रजापतिं । प्रजापतिं प्रजाः । प्रजापतिमिति प्रजा-पतिं । प्रजा उपावर्तन्त । प्रजा इति प्र-जाः । उपावर्तन्त यः । उपावर्तन्तेत्युप-आवर्तन्त । यः प्रजाकामः । प्रजाकामस्स्यात् । प्रजाकाम इति प्रजा-कामः । स्यात्तस्मै । तस्मा एतं । एतं प्राजापत्यं । प्राजापत्यं गार्मुतं । प्राजापत्यमिति प्राजा-पत्यं । गार्मुतं चरुं । चरुं निः । निर्वपेत् । वपेत्प्रजापतिं । प्रजापतिमेव । प्रजापतिमिति प्रजा-पतिं ()

काण्ड -2, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवास्मै । अस्मेप्रजां । प्रजां प्र । प्रजामिति प्र-जाम् । प्र जनयति । जनयति प्रजापतिः । प्रजापतिः पशून् । प्रजापतिरिति प्रजा-पतिः । पशूनसृजत । असृजत ते । तेऽस्मात् । अस्माथ्सृष्टाः । सृष्टाः पराञ्चः । पराञ्च आयन्न् ।

आयन्ते । ते यत्र । यत्रावसन्न् । अव- सन्ततः । ततोगर्मुत् । गर्मुदुत् । उदतिष्ठत् । अतिष्ठत्तान् । तान्पूषा । पूषा च । चान्ववैतां । अन्ववैताꣳ सः । अन्ववैतामित्यनु-अवैतां । सौब्रवीत् । अब्रवीत्पूषा । पूषानयाँ । अनया मा । मा प्र । प्र तिष्ठ । तिष्ठाथ । अथ ब्बा । ब्बा पशवः । पशव उपावर्ध्यन्ति । उपावर्ध्यन्तीति । उपावर्ध्यन्तीत्युप-आवर्ध्यन्ति । इति मां । मां प्र । प्र तिष्ठ । तिष्ठेति । इति सोमः । सोमौऽब्र-वीत् । अब्रवीन्ममं । मम वै ()

काण्ड -2, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। वा अकृष्टपच्यं । अकृष्टपच्यमिति । अकृष्टपच्यमित्यकृष्ट-पच्यं । इत्युभौ । उभौ वाँ । वां प्र । प्र तिष्ठानि । तिष्ठानीति । इत्यब्रवीत् । अब्रवीत्तौ । तौ प्र । प्रातिष्ठत् । अतिष्ठत्ततः । ततो वै । वै प्रजापतिं । प्रजापतिं पशवः । प्रजापतिमिति प्रजा-पतिं । पशव उपावर्तन्त । उपावर्तन्त यः । उपावर्तन्तेत्युप-आवर्तन्त । यः पशुकामः । पशुकामस्स्यात् । पशुकाम इति पशु-कामः । स्यात्तस्मै । तस्मा एतं । एतꣳ सोमापौष्णं । सोमापौष्णं गाँर्मुतं । सोमापौष्ण मिति सोमा-पौष्णं । गार्मुतं चरुं । चरुं निः । निर्वपेत् । वपेथ्सोमापूषणौ । सोमा-पूषणावेव । सोमापूषणाविति सोमा-पूषणौ । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति तौ । तावेव । एवास्मै । अस्मे पशून् । पशून्र । पजनयतः । जनयत स्सोमः । सोमो वै । वै रेतोधाः । रेतोधाः पूषा । रेतोधा इति रेतः-धाः । पूषा पशूनां । पशूनां प्रजनयिता । प्रजनयिता सोमः । प्रजनयितेति प्र-जनयिता । सोम एव । एवास्मै । अस्मे रेतः । रेतो दधाति । दधाति पूषा । पूषा पशून् । पशून्र । प्रजनयति । जनयतीति जनयति () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

अग्ने॑ गोभिः । गोभि॑र्नः । न॒ आ । आग॑हि । गृ॒हीदौ॑ । इ॒दो॒ पु॒ष्टा । इ॒दो॒ इ॒तीदौ॑ । पु॒ष्टा जु॑षस्व । जु॒षस्व॑ नः । न इति॑ नः ॥ इन्द्रो॑ धर्ता । धर्ता गृहेषु॑ । गृहेषु॑ नः । न इति॑ नः । सवि॒ता यः । यस्स॑हस्रि॒यः । स॒हस्रि॒यस्सः । स न॑ः । नो॒ गृहेषु॑ । गृहेषु॑ रारणत् । रा॒र॒ण॒दिति॑ रारणत् ॥ आ पूषा । पूषा ए॑तु । ए॒त्वा । आ वसु॑ । वस्विति॒ वसु॑ ॥ धाता द॑दातु । द॒दा॒तु॒ नः । नो॒ र॒यिम् । र॒यिमीशा॑नः । ईशा॑नो॒ जग॑तः । जग॑त॒स्पतिः॑ । पति॒रिति॒ पतिः॑ ॥ स न॑ः । नः॒ पूर्ण॑न । पूर्ण॑न वावनत् । वा॒व॒न॒दिति॑ वावनत् ॥ त्वष्टा॒ यः । यो वृ॑षभः । वृ॒ष॒भो वृषा॑ । वृषा॒ सः । स न॑ः । नो॒ गृहेषु॑ । गृहेषु॑ रारणत् । रा॒र॒ण॒दिति॑ रारणत् ॥ स॒हस्रे॑णायु॒तेन॑ । अ॒यु॒तेन॑ च । चेति॑ च ॥ येन॑ देवाः । देवा अ॒मृत॑ ()

काण्ड -2, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। अ॒मृत॑ दीर्घं । दी॒र्घꣳ॑ श्रवः॑ । श्रवो॑ दि॒वि । दि॒व्यैर॑यन्त । ऐर॑यन्ते त्यैर॑यन्त ॥ राय॑स्पोष । पोष॒ त्वं । त्व॒मस्मभ्य॑ं । अ॒स्मभ्यं॑गवा॑ । अ॒स्मभ्य॒मित्य॒स्म-भ्य॑ं । गवा॑ कु॒ल्मिं । कु॒ल्मिं जी॒वसे॑ । जी॒वस॒ आ । आ यु॑वस्व । यु॒व॒स्वेति॑ युवस्व ॥ अ॒ग्निर्गृ॒हप॑तिः । गृ॒हप॑ति॒स्सोम॑ः । गृ॒हप॑ति॒रिति॑ गृह-पतिः । सोमो॑ विश्ववनिः॑ । वि॒श्व॒वनि॑स्सविता । वि॒श्व॒वनि॒रिति॑ विश्व-वनिः॑ । स॒वि॒तास॑ुमेधाः । सु॒मे॒धाः स्वाहा॑ । सु॒मे॒धा इति॑ सु-मे॒धाः । स्वाहे॒ति॒ स्वाहा॑ ॥ अग्ने॑ गृहपते । गृ॒हप॑ते यः । गृ॒हप॑त॒ इति॑ गृह-प॑ते । यस्त॑ै । ते॒ घृत्यः॑ । घृत्यो॑ भा॒गः । भा॒गस्तेन॑ । तेन॒ सहः॑ । सह॒ ओजः॑ । ओज॑ आक्रम॑माणाय । आ॒क्रम॑माणाय धेहि । आ॒क्रम॑माणा॒येत्या॑-क्रम॑माणाय । धे॒हि॒ श्रैष्ठ्या॑त् । श्रैष्ठ्या॑त्पथः । पथो मा । मा यो॑षं । यो॒षं॒ मूर्धा । मूर्धा भू॑यासं । भू॒या॒स॒ꣳ॑ स्वाहा॑ । स्वाहे॒ति॒ स्वाहा॑ () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

चित्रया॑ यजेत । यजे॑त पशुका॑मः । पशुका॑म ह्ये॑यं । पशुका॑म॒ इति॑ पशु-का॑मः । ह्ये॑यं वै । वै चि॒त्रा । चि॒त्रा यत् । यद्वै । वा अ॒स्या॑म् । अ॒स्या॑म् विश्वँ॑ । विश्व॑ भू॒तं । भू॒तमधि॑ । अधि॑ प्र॒जाय॑ते । प्र॒जाय॑ते तेन॑ । प्र॒जाय॑त॒ इति॑ प्र-जाय॑ते । तेने॒यं । ह्ये॑यं चि॒त्रा । चि॒त्रा यः । य एवं । एव॑ विद्वान् । विद्वाꣳश्चि॒त्रया॑ँ । चि॒त्रया॑ पशुका॑मः । पशुका॑मो यजते । पशुका॑म॒ इति॑ पशु-का॑मः । यज॑ते प्र । प्र प्र॒जया॑ँ । प्र॒जया॑ पशु॒भिः॑ । प्र॒जये॑ति॑ प्र-जया॑ँ । पशु॒भिर्मि॑थु॒नैः॑ । पशु॒भिरि॑ति॑ पशु-भिः॑ । मि॒थु॒नैर्जा॑यते । जा॒यते॒ प्र । प्रैव । एवाग्ने॒येन॑ । आग्ने॒येन॑ वापयति । वा॒प॒य॒ति॒ रेतः॑ । रेत॑स्सौ॒म्येन॑ । सौ॒म्येन॑ दधाति । द॒धा॒ति॒ रेतः॑ । रेत॑ एव । एव ह्ये॑तं । ह्ये॑तं ब्रष्टा॑ । ब्रष्टा॑रूपाणि॑ । रू॒पाणि॒ वि । वि॑क॒रोति॑ । क॒रोति॑ सारस्व॒तौ । सा॒र॒स्व॒तौ भ॑वतः । भ॒व॒त॒ एतत् । एत॒द्वै । वै दैव्यँ॑ । दैव्य॑ मिथु॒नं । मि॒थु॒नं दैव्यँ॑ । दैव्य॑मेव । एवास्मैँ॑ ()

काण्ड -2, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

॥ अ॒स्मै॒ मि॒थु॒नं । मि॒थु॒नं म॑ध्य॒तः । म॒ध्य॒तो द॑धाति । द॒धा॒ति॒ पुष्टैँ॑ । पुष्टैँ॑ प्र॒जन॑नाय । प्र॒जन॑नाय सिनीवा॒ल्यै । प्र॒जन॑नायेति॑ प्र-जन॑नाय । सि॒नी॒वा॒ल्यै चरुः॑ । चरु॑र्भवति । भ॒व॒ति॒ वाक् । वाग्वै । वै सि॑नीवा॒ली । सि॒नी॒वा॒ली पुष्टिः॑ । पुष्टि॒ः खलु॑ । खलु॒ वै । वै वाक् । वाक्पुष्टैँ॑म् । पुष्टि॑ मे॒व । एव वाचँ॑ । वाच॒मुप॑ । उपै॑ति । ए॒त्येँ॑द्रः । ऐँ॑द्र उ॑त्त॒मः । उ॒त्त॒मो भ॑वति । उ॒त्त॒म इत्यु॑त्-त॒मः । भ॒व॒ति॒ तेन॑ । तेने॒व । एव तत् । तन्मि॑थु॒नं । मि॒थु॒नꣳ स॒प्त । स॒प्तैतानि॑ । एतानि॑ हवीꣳषि॑ । ह॒वीꣳषि॑ भवन्ति । भ॒व॒न्ति॒ स॒प्त । स॒प्त ग्रा॒म्याः । ग्रा॒म्याः प॒शव॑ः । प॒शव॑स्स॒प्त । स॒प्तार॒ण्याः । आ॒र॒ण्या-स्स॒प्त । स॒प्त छंदाꣳ॑सि । छंदाꣳ॑स्युभय॒स्य । उ॒भ॒य॒स्यावरु॑द्ध्यै । अव॑रुद्ध्या अर्थं । अव॑रुद्ध्या इत्यव॑-रुद्ध्यै । अ॒थै॒ताः । ए॒ता आहु॑तीः । अहु॑तीर्जुहोति । आहु॑तीरित्या-हुतीः । जुहो॒त्ये॒ते । ए॒ते वै । वै दे॒वाः । दे॒वाः पुष्टि॑पतयः । पुष्टि॑पतय॒स्ते । पुष्टि॑पतय॒ इति॒ पुष्टि॑-पतयः । त एव । एवास्मिन्॑ । अ॒स्मि॒न्पुष्टैँ॑ । पुष्टि॑ दधति । द॒धति॒ पुष्य॑ति । पुष्य॑ति प्र॒जया॑ँ । प्र॒जया॑ पशु॒भिः॑ । प्र॒जये॑ति॑ प्र-जया॑ँ । प॒शु॒भिर॑थौँ । प॒शु॒भिरि॑ति॑ पशु-भिः॑ । अथो यत् । अथो॒ इत्यथौँ॑ । यदे॒ताः । ए॒ता आहु॑तीः । आहु॑तीर्जुहोति॑ । आहु॑तीरित्या-हुतीः । जुहो॑ति॒ प॑तिष्ठित्यै । प्र॒ति॒ष्ठि॒त्या इति॒ प्रति॑-स्थित्यै () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

मारुतमसि । असि मरुताँ । मरुतामोजः । ओजोपां । अपां धाराँ । धाराँ भिन्धि । भिन्दिरमयत । रमयत मरुतः । मरुत श्श्येनं । श्येनमायिनँ । आयिनं मनोजवसं । मनोजवसं वृषणं । मनोजवस मिति मनः_जवसं । वृषणꣳ सुवृक्तिम् । सुवृक्ति मिति सु-वृक्तिं ॥ येन शर्धः । शर्ध उग्रं । उग्रमवसृष्टं । अवसृष्ट मेति । अवसृष्टमित्यव-सृष्टं । एततत् । तदश्विना । अश्विना परि । परि धत्तं । धत्तꣳ स्वस्ति । स्वस्तीति स्वस्ति ॥ पुरोवातो वर्षन्न् । पुरोवात इति पुरः-वातः । वर्षञ्जिन्वः । जिन्वरावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहा वातावत् । वातावद्वर्षन्न् । वातावदिति वात-वत् । वर्ष- न्नुग्रः । उग्रावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहाँ स्तनयन्न् । स्तनयन्वर्षन्न् । वर्षन्भीमः । भीमरावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहाऽनशनि । अनशन्यवस्फूर्जन्न् । अवस्फूर्जन्दिद्युत् । अवस्फूर्जन्नित्यव-स्फूर्जन्न् । दिद्युद्वर्षन्न् । वर्षन्क्षेपः । क्षेपरावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहाऽतिरात्रं । अति रात्रं वर्षन्न् । अतिरात्रमित्यति-रात्रं । वर्षन्पूर्तिः । पूर्ति रावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् ()

काण्ड -2, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। स्वाहा बहु । बहुह । हायम् । अयमवृषात् । अवृषादिति । इति श्रुतः । श्रुत रावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहाऽऽ तपति । आतपति वर्षन्न् । आतपतीत्याँ-तपति । वर्षन्विराट् । विराडावृत् । विराडिति वि-राट् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहाऽवस्फूर्जन्न् । अवस्फूर्जन्दिद्युत् । अवस्फूर्जन्नित्यव-स्फूर्जन्न् । दिद्युद्वर्षन्न् । वर्षन्भूतः । भूतरावृत् । आवृथ्स्वाहाँ । आवृदित्याँ-वृत् । स्वाहा मान्दाः । मान्धा वाशाः । वाशाश्शुन्ध्यूँ । शुन्ध्यू रजिराः । अजिरा इत्यजिराः ॥ ज्योतिष्मतीस्तमस्वरीः । तमस्वरी रुदतीः । उन्दतीस्सुफेनाः । सुफेना इति सु-फेनाः ।

मित्रंभृतः, क्षत्रंभृतः । मित्रंभृत इति मित्र-भृतः । क्षत्रंभृतस्सुराँष्ट्राः । क्षत्रंभृत इति क्षत्र-भृतः । सुराँष्ट्रा इह । सुराँष्ट्रा इति सु-राष्ट्राः । इहमाँ । माऽवत । अवतेत्यवत ॥ वृष्णो अश्वस्य । अश्वस्य सदानँ । सदानमसि । सदानमिति सं-दानँ । असि वृष्ट्यै । वृष्ट्यै त्वा । त्वोप । उपनह्यामि । नह्यामीति नह्यामि () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

देवा वसव्याः । वसव्या अग्नै । अग्नें सोम । सोम सूर्य । सूर्येति सूर्य ॥ देवाँश्चर्मण्याः । शर्मण्या मित्रावरुणा । मित्रावरुणार्यमन्न् । मित्रावरुणेति मित्रा-वरुण । अर्यमनित्यर्यमन्न् ॥ देवाँस्सपीतयः । सपीत योपाँ । सपीतय इति स-पीतयः । अपाँ नपात् । नपादाशुहेमन्न् । आशुहेमन्नित्याशु-हेमन्न् ॥ उद्नो दत्त । दत्तोदधिं । उदधिं भिन्त । उदधि मित्युद-धिम् । भिन्तदिवः । दिवः पर्जन्याँत् । पर्जन्यादंतरिक्षात् । अंतरिक्षा त्पृथिव्याः । पृथिव्यास्ततः । ततोनः । नोवृष्ट्याँ । वृष्ट्याऽवत । अवते त्यवत ॥ दिवा चित् । चित्तमः । तमः कृण्वंति । कृण्वंति पर्जन्येन । पर्जन्येनोद- वाहेन । उदवाहेनेत्युद-वाहेन । पृथिवीं यत् । यद्भुन्दन्ति । व्युन्दन्तीति वि-उन्दन्ति । आयं । यंनरः । नरस्सुदानवः । सुदानवो ददाशुषँ । सुदानव इति सु-दानवः । ददाशुषे दिवः । दिवः कोशँ । कोशमचुच्यवुः । अचुच्यवु-रित्यचुच्यवुः ॥ विपर्जन्याँ । पर्जन्याँस्सृजंति । सृजंति रोदसी । रोदसी अनु । रोदसी इति रोदसी । अनु धन्वना । धन्वनायंति ()

काण्ड -2, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। यंति वृष्टयः । वृष्टय इति वृष्टयः ॥ उदीरयथ । ईरयथामरुतः । मरुतस्समुद्रतः । समुद्रतो यूयं । यूयं वृष्टिं । वृष्टिं वर्षयथ । वर्षयथा-पुरीषिणः । पुरीषिण इति पुरीषिणः ॥ न वः । वो दस्राः । दस्रा उप । उप-दस्यंति । दस्यंति धेनवः । धेनवश्शुभँ । शुभं यातां । यातामनु । अनु रथाँः । रथा अवृथ्सत । अवृथ्सते त्यवृथ्सत ॥ सृजा वृष्टिं । वृष्टिं

दिवः । दिव आ । आद्भिः । अद्भिस्समुद्रं । अद्भिरित्यत्-भिः । समुद्रं पृण । पृणेतिपृण ॥ अब्बा असि । अब्बा इत्यप्-जाः । असि प्रथमजाः । प्रथमजा बलं । प्रथमजा इति प्रथम-जाः । बलमसि । असि समुद्रियम् । समुद्रिय मिति समुद्रियम् ॥ उन्नभय । नभय पृथिवीं । पृथिवीं भिन्धि । भिन्धीदं । इदं दिव्यं । दिव्यं नभः । नभ इति नभः ॥ उद्नो दिव्यस्य । दिव्यस्य नः । नो देहि । देहीशानः । ईशानो वि । वि सृज । सृजा दृतिम् । दृतिमिति दृतिं ॥ ये देवाः । देवा दिविभागाः । दिविभागा ये । दिविभागा इति दिवि-भागाः । यैऽन्तरिक्षभागाः । अन्तरिक्षभागा ये । अन्तरिक्षभागा इत्यन्तरिक्ष-भागाः । ये पृथिविभागाः । पृथिविभागा इति पृथिवि-भागाः ॥ त इमं । इमं यज्ञं । यज्ञमवंतु ॥ अवन्तुते । त इदं । इदं क्षेत्रं । क्षेत्र मा । आविशंतु । विशंतु ते । त इदं । इदं क्षेत्रं । क्षेत्रमनु । अनु वि । विविशंतु । विशन्विति विशंतु () ॥॥

काण्ड -2, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -काम्येष्टि-ब्राह्मणम्,

। तनक्ति सेंद्रबायं । सेंद्रबायाँग्निहोत्रोच्छेषणं । सेंद्रबायेति सेंद्र-बायं । अग्निहोत्रोच्छेषणमभ्यातनक्ति । अग्निहोत्रोच्छेषणमित्यग्निहोत्र-उच्छेषणं । अभ्यातनक्ति यज्ञस्यं । अभ्यातनक्तीत्यभि-आतनक्ति । यज्ञस्य संतत्यै । संतत्या इंद्रः । संतत्या इति सं-तत्यै । इंद्रो वृत्रं । वृत्रꣳ हत्वा । हत्वा परां । परां परावतँ । परावतमगच्छत् । परावतमिति परा-वतँ । अगच्छदप । अपाराधं । अराधमिति । इति मन्यमानः । मन्यमानस्तं । तं देवताँः । देवताः प्रैषँ । प्रैषमैच्छन् । प्रैषमिति प्र-एषँ । ऐच्छन्सः । सोँऽब्रवीत् । अब्रवीत्प्रजापतिः । प्रजापतिर्यः । प्रजापतिरिति प्रजा-पतिः । यः प्रथमः । प्रथमोऽनुविंदति । अनुविंदति तस्य । अनुविंदतीत्यनु-विंदति । तस्य प्रथमं । प्रथमं भागधेयँ । भागधेयमिति । भागधेयमिति भाग-धेयँ । इति तं । तं पितरः । पितरोऽनु । अन्वविंदन्न् । अविंदन्तस्माँत् । तस्माँत्पितृभ्यः । पितृभ्यः पूर्वेद्युः । पितृभ्य इति पितृ-भ्यः । पूर्वेद्युः क्रियते । क्रियते सः । सोऽमावास्याँ । अमावास्याँ प्रति । अमावास्यामित्यमा-वास्याँ । प्रत्या । आगच्छत् । अगच्छत्तं । तं देवाः । देवा अभि । अभि सं । समगच्छंत । अगच्छंतामा । अमा वै । वै नः ()

काण्ड -2, प्रपाठक -5, अनुवाक -3, अनुवाक सूक्तम -7,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। नोऽद्य । अद्यवसु । वसु वसति । वसतीति । इतींद्रः । इंद्रो हि । हि देवानाँ । देवानांवसु । वसुतत् । तदमावास्यायाः । अमावास्याया अमावास्यꣳ । अमावास्याया इत्यमा-वास्यायाः । अमावास्यꣳ ब्रह्म-वादिनः । अमावास्यꣳमित्यमावास्य-ꣳ । ब्रह्मवादिनो वदंति । ब्रह्मवादिन इति ब्रह्म-वादिनः । वदंति किं देवत्यँ । किं देवत्यꣳ सान्नाय्यं । किं देवत्यमिति किं-देवत्यँ । सान्नाय्यमिति । सान्नाय्यमिति सां-नाय्यं । इति वैश्वदेवं । वैश्वदेवमिति ।

वैश्वदेवमिति वैश्व-देवं । इति ब्रूयात् । ब्रूयाद्विश्वै । विश्वे हि । हि तत् । तद्देवाः । देवा भागधेयँ । भागधेयमभि । भागधेय-मिति भाग-धेयँ । अभिसमगच्छंत । समगच्छंतेति । समगच्छंतेति सं- अगच्छंत । इत्यथौ । अथो खलु । अथो इत्यथौ । खल्वेंद्रं । ऐंद्रमिति । इत्येव । एव ब्रूयात् । ब्रूयादिंद्रँ । इंद्रं वाव । वाव ते । ते तत् । तद्भिषज्यंतः । भिषज्यंतोऽभि । अभि सं । समगच्छंत । अगच्छंतेति । इतीतीति () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -4, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

ब्रह्मवादिनो वदंति । ब्रह्मवादिन इति ब्रह्म-वादिनः । वदंति सः । स तु । वै । वै दर्शपूर्णमासौ । दर्शपूर्णमासौ यजेत । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । यजेत यः । य एनौ । एनौ सेंद्रौ । सेंद्रौ यजेत । सेंद्राविति स-इंद्रौ । यजेतेति । इति वैमृधः । वैमृधः पूर्णमासे । पूर्णमासेऽनुनिर्वाप्यः । पूर्णमास इति पूर्ण-मासे । अनुनिर्वाप्यो भवति । अनुनिर्वाप्य इत्यनु-निर्वाप्यः । भवति तेन । तेन पूर्णमासः । पूर्णमासस्सेंद्रः । पूर्णमास इति पूर्ण-मासः । सेंद्र ऐंद्रं । सेंद्र इति स-इंद्रः । ऐंद्रं दधि । दध्यमावास्यायां । अमावास्यायां तेन । अमावास्यायामित्यमा-वास्यायां । तेनामावास्यौ । अमावास्या सेंद्रौ । अमावास्येत्यमा-वास्यौ । सेंद्रा यः । सेंद्रेति स-इंद्रा । य एवं । एवं विद्वान् । विद्वान्दर्शपूर्णमासौ । दर्शपूर्णमासौ यजते । दर्शपूर्ण-मासाविति दर्श-पूर्णमासौ । यजते सेंद्रौ । सेंद्रावेव । सेंद्राविति स-इंद्रौ । एवैनौ । एनौ यजते । यजतेश्वश्वः । श्वश्वौऽस्मै । श्वश्व इति श्वः-श्वः । अस्मा ईजानाय । ईजानाय वसीयः । वसीयो भवति । भवति देवाः । देवा वै । वै यत् । यद्यज्ञे । यज्ञेऽकुर्वत । अकुर्वत तत् । तदसुराः । असुरा अकुर्वत । अकुर्वत ते । ते देवाः । देवा एतां ()

काण्ड -2, प्रपाठक -5, अनुवाक -4, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। एतामिष्टिँ । इष्टिमपश्चन्न् । अपश्यन्नाग्नावैष्णवं । आग्नावैष्णवमेकादशकपालं । आग्नावैष्णवमित्याँग्ना-वैष्णवं । एकादशकपालꣳ सरस्वत्यै । एकादशकपालꣳ मित्येकादश-कपालं । सरस्वत्यै चरुं । चरुꣳ सरस्वते । सरस्वते चरुं । चरुं तां । तां पौँर्णमासं । पौर्णमासꣳ सꣳस्थाप्यं । पौर्णमासमिति पौर्ण-मासं । सꣳस्थाप्यानु । सꣳस्थाप्येति सं-स्थाप्यं । अनु निः । निरवपन्न् । अवपन्ततः । ततो देवाः । देवा अभवन्न् । अभवन्परा । पराऽसुराः । असुरायः । यो भ्रातृव्यवान् । भ्रातृव्यवान्त्स्यात् । भातृव्यवानिति भ्रातृव्य-वान् । स्यात्सः । स पौँर्णमासं । पौर्णमासꣳ सꣳस्थाप्यं । पौर्णमासमिति पौर्ण-मासं । सꣳस्थाप्येतां । सꣳस्थाप्येति सं-स्थाप्यं । एतामिष्टिँ । इष्टिमनु । अनु निः । निर्वपेत् । वपेत्पौर्णमासेन । पौर्णमासेनैव । पौर्णमासेनेति पौर्ण-मासेन । एव वज्रँ । वज्रं भ्रातृव्याय । भ्रातृव्याय प्रहृत्य । प्रहृत्याँग्नावैष्णवेन । प्रहृत्येति प्र-हृत्य । आग्नावैष्णवेन देवताः । आग्नावैष्णवेनेत्याँग्ना-वैष्णवेन । देवताँश्च । च यज्ञं । यज्ञं च । च भ्रातृव्यस्य । भ्रातृव्यस्य वृक्ते । वृक्ते मिथुनान् । मिथुनान्पशून् । पशूंथ्सारस्वताभ्याँ । सारस्वताभ्यां यावत् । यावदेव । एवास्य । अस्यास्ति । अस्तितत् ()

काण्ड -2, प्रपाठक -5, अनुवाक -4, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। तथँवं । सवँ वृक्ते । वृक्ते पौर्णमासीं । पौर्णमासी मेव । पौर्णमासीमिति पौर्ण-मासीं । एव यजेत । यजेत भ्रातृव्यवान् । भ्रातृव्यवान्न । भ्रातृव्यवानिति भ्रातृव्य-वान् । नामावास्याँ । अमावास्याꣳ हत्वा । अमावास्यामित्यमा-वास्याँ । हत्वा भ्रातृव्यं । भ्रातृव्यं न । ना । आप्याययति । प्याययति साकंप्रस्थायीयेन । साकंप्रस्थायीयेन यजेत । साकं प्रस्थायीयेनेति साकं-प्रस्थायीयेन । यजेत पशुकामः । पशुकामो यस्मै । पशुकाम इति पशु-कामः । यस्मै वै । वा अल्पेन । अल्पेनाहरति । आहरति न । आहरतीत्याँ-हरति । नात्मनाँ । आत्मना तृप्यति । तृप्यति न । नान्यस्मै । अन्यस्मै ददाति । ददाति यस्मै । यस्मै महता । महता तृप्यति । तृप्यत्यात्मनाँ । आत्मना ददाति । ददात्यन्यस्मै । अन्यस्मै महता । महता पूर्णं । पूर्णꣳ होतव्यँ । होतव्यं तृप्तः । तृप्त एव । एवैनँ । एनमिंद्रः । इंद्रः प्रजयाँ । प्रजया

पशुभिः । प्रजयेति प्र-जयाँ । पशुभिस्तर्पयति । पशुभिरिति पशु-भिः । तर्पयति दारुपात्रेण । दारुपात्रेण जुहोति । दारुपात्रेणेति दारु-पात्रेण । जुहोति न । न हि । हि मृन्मयँ । मृन्मयमाहुति । मृन्मयमिति मृत्-मयँ । आहुतिमानशे । आहुतिमित्या-हुतिं । आनश औदुंबरं ()

काण्ड -2, प्रपाठक -5, अनुवाक -4, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। औदुंबरं भवति । भवत्यूर्क् । ऊर्ग्वै । वा उदुंबरः । उदुंबर ऊर्क् । ऊर्क्पशवः । पशव ऊर्जा । ऊर्जैव । एवास्मै । अस्मा ऊर्जँ । ऊर्जं पशून् । पशूनव । अव रुंधे । रुंधेन । नागश्रीः । अगतश्रीर्महेंद्रं । अगतश्रीरित्यगत-श्रीः । महेंद्रं यजेत । महेंद्रमिति महा-इंद्रं । यजेत त्रयः । त्रयो वै । वै गतश्रियः । गतश्रियशुश्रुवान् । गतश्रिय इति गत-श्रियः । शुश्रुवान्ग्रामणीः । ग्रामणी राजन्यः । ग्रामणीरिति ग्राम-नीः । राजन्यस्तेषाँ । तेषाँ महेंद्रः । महेंद्रो देवताँ । महेंद्र इति महा-इंद्रः । देवता यः । योवै । वै स्वां । स्वां देवताँ । देवतामतियजते । अतियजते प्र । अतियजत इत्यति-यजते । प्र स्वायै । स्वायै देवताये । देवताये च्यवते । च्यवते न । न पराँ । परां प्र । प्राप्नोति । आप्नोति पापीयान् । पापीयान्भवति । भवति संवथ्सरं । संवथ्सरमिंद्रँ । संवथ्सतमिति सं-वत्सरं । इंद्रं यजेत । यजेत संवथ्सरं । संवथ्सरꣳ हि । संवथ्सरमिति सं-वथ्सरं । हि व्रतं । व्रतं न । नाति । अति स्वा ()

काण्ड -2, प्रपाठक -5, अनुवाक -4, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। स्वेव । एवैनँ । एनं देवताँ । देवतेज्यमाना । इज्यमाना भूत्यै । भूत्या इंधे । इंधे वसीयान् । वसीयान्भवति । भवति संवथ्सरस्य । संवथ्सरस्य परस्तात् । संवथ्सरस्येति सं-वथ्सरस्य । परस्तादग्नयै । अग्नयै व्रतपतये । व्रतपतये पुरोडाशँ । व्रतपतय इति व्रत-पतये । पुरोडाशमष्टाकपालं । अष्टाकपालं निः । अष्टाकपालमित्यष्टा-कपालं । निर्वपेत्

। वपेत्संवथ्सरं । संवथ्सरमेव । संवथ्सरमिति सं-वथ्सरं । एवैनँ । एनं वृत्रं । वृत्रं जघ्निवाꣳसँ । जघ्निवाꣳसमग्नीः । अग्निर्व्रत- पतिः । व्रतपतिर्व्रतं । व्रतपतिरिति व्रत-पतिः । व्रतमा । आलभयति । लभयति ततः । ततोधि । अधि कामँ । कामं यजेत । यजेतेति यजेत () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -5, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

नासोमयाजी । असोमयाजी सं । असोमयाजीत्यसोम-याजी । सं नयेत् । नयेदनागतं । अनागतं वै । अनागतमित्यनाँ-गतं । वा एतस्य । एतस्य पयः । पयो यः । योऽसोमयाजी । असोमयाजीयत् । असोमयाजीत्यसोम-याजी । यदसोमयाजी । असोमयाजी संनयैत् । असोमयाजीत्यसोम-याजी । संनयैत्परिमोषः । संनयेदिति सं-नयैत् । परिमोष एव । परिमोष इति परि-मोषः । एव सः । सोऽ- नृतं । अनृतं करोति । करोत्यथौ । अथो परा । अथो इत्यथौ । परैव । एव सिच्यते । सिच्यते सोमयाजी । सोमयाज्येव । सोमयाजीति सोम-याजी । एव सं । सं नयेत् । नयेत्पयः । पयो वै । वै सोमः । सोमः पयः । पयस्सान्नाय्यं । सान्नाय्यं पयसा । सान्नाय्यमिति सा-नाय्यं । पयसैव । एव पयः । पय आत्मन् । आत्मन्धत्ते । धत्ते वि । वि वै । वा एतं । एतं प्रजया । प्रजया पशुभिः । प्रजयेति प्र-जया । पशुभिरर्धयति । पशुभिरिति पशु-भिः । अर्धयति वर्धयति । वर्धयत्यस्य । अस्य भ्रातृव्यं । भ्रातृव्यं यस्य । यस्य हविः । हविर्निरुप्तं । निरुप्तं पुरस्तात् । निरुप्तमिति निः-उप्तं । पुरस्ताच्चन्द्रमाः ()

काण्ड -2, प्रपाठक -5, अनुवाक -5, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। चन्द्रमा अभि । अभ्युदेति । उदेति त्रेधा । उदेतीत्युत्-एति । त्रेधा तण्डुलान् । तण्डुलान्, वि । वि भजेत् । भजेद्ये । ये मध्यमाः । मध्यमास्स्युः । स्युस्तान् । तानग्नयै । अग्नये दात्रे । दात्रे पुरोडाशं । पुरोडाशमष्टाकपालं ।

अ॒ष्टाक॑पालं कुर्यात् । अ॒षाक॑पाल-मित्य॒ष्टा-क॒पा॒लं॒ । कु॒र्या॒दे॒ । ये स्थवि॑ष्ठाः । स॑वि॒ष्ठास्तान् । तानिंद्रा॑य । इंद्रा॑य प॒दात्रे । प्र॒दात्रे॒ द॒धन्न् । प्र॒दात्र॒ इति॑ प्र-दात्रे । दधः॑ श्चरुं । च॒रुं॒ ये । येऽणि॑ष्ठाः । अणि॑ष्ठा॒स्तान् । तान्, विष्ण॑वे । विष्ण॑वे शिपिवि॒ष्टाय॑ । शि॒पि॒-वि॒ष्टाय॑ श्रृते । शि॒पि॒वि॒ष्टाये॑ति॑ शिपि-वि॒ष्टाय॑ । श्रृते च॒रुं । च॒रुम॒ग्निः । अ॒ग्नि- रे॒व । ए॒वास्मै॑ । अ॒स्मै॒ प्र॒जां । प्र॒जां प्र॑ज॒नय॑ति । प्र॒जामिति॑ प्र-जां । प्र॒ज॒नय॑ति वृ॒द्धां । प्र॒ज॒नय॒तीति॑ प्र-ज॒नय॑ति । वृ॒द्धामिंद्रः॑ । इंद्र॒ः प्र । प्र य॑च्छति । य॒च्छ॒ति॒ य॒ज्ञः । य॒ज्ञो वै । वै विष्णुः॑ । विष्णुः॑ प॒शवः॑ । प॒शव॒श्शिपिः॑ । शिपि॑र्य॒ज्ञे । य॒ज्ञ ए॒व । ए॒व प॒शुषु॑ । प॒शुषु॒ प्रति॑ । प्रति॑ तिष्ठति । ति॒ष्ठ॒ति॒ न । न द्वे ()

काण्ड -2, प्रपाठक -5, अनुवाक -5, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। द्वे य॑जेत । द्वे इति॒ द्वे । य॒जे॒त॒ यत् । यत्पूर्व॑या । पूर्व॑या सं॒प्रति । सं॒प्रति यजे॑त । सं॒प्रतीति॑ सं-प्रति । यजे॒तोत्त॑रया । उत्त॑रया छं॒बट् । उत्त॑रयेत्युत्-त॒रया॒ । छं॒बट्कु॑र्यात् । कु॒र्या॒द्यत् । यदु-त्त॑रया । उत्त॑रया सं॒प्रति । उत्त॑रयेत्युत्-त॒रया॒ । सं॒प्रति यजे॑त । सं॒प्रतीति॑ सं-प्रति । यजे॑त॒ पूर्व॑या । पूर्व॑या छं॒बट् । छं॒बट्कु॑र्यात् । कु॒र्या॒न्न । नेष्टिः॑ । इ॒ष्टि॒ र्भव॑ति । भव॑ति॒न । न॒य॒ज्ञः । य॒ज्ञस्तत् । तदनु॑ । अनु॑ह्वीतमुखी । ह्वी॒त॒मु॒ख्य॑पगल्भः । ह्वी॒त॒मु॒खीति॑ ह्वीत-मु॒खी । अ॒पग॑ल्भो जा॑यते । अ॒पग॑ल्भ इत्य॑प-ग॒ल्भः॒ । जा॒य॒त॒ एका॑ । एका॑मे॒व । ए॒व य॑जेत । य॒जे॒त॒ प्र॒ग॒ल्भः॑ । प॒ग॒ल्भो॑ऽस्य । प्र॒ग॒ल्भ इति॑ प्र-ग॒ल्भः॒ । अ॒स्य॒ जा॒य॒ते॒ । जा॒य॒तेऽना॑दृत्य । अना॑दृत्य॒ तत् । अना॑दृत्येत्यना॑-दृ॒त्य॒ । तद्वे । द्वे ए॒व । द्वे इति॒ द्वे । ए॒व य॑जेत । य॒जे॒त॒ य॒ज्ञमु॑खं । य॒ज्ञमु॑खमे॒व । य॒ज्ञमु॑खमिति॑ यज्ञ-मु॒खं । ए॒व पूर्व॑या । पूर्व॑याल॑भते । आ ल॑भते॒ यज॑ते । आ ल॑भत॒ इत्या॑-ल॑भते । यज॑त॒ उत्त॑रया । उत्त॑रया दे॒वता॑ः । उत्त॑रयेत्युत्- त॒रया॒ । दे॒वता॑ ए॒व । ए॒व पूर्व॑या । पूर्व॑यावरुंधे । अ॒वरु॑ंध इंद्रि॒यं । अ॒वरु॑ंध इत्य॑व-रु॑ंधे । इंद्रि॒यमुत्त॑रया । उत्त॑रया देव- लो॒कं । उत्त॑रयेत्युत्- त॒रया॒ । दे॒वलो॒कमे॒व । दे॒वलो॒कमिति॑ देव-लो॒कं ()

काण्ड -2, प्रपाठक -5, अनुवाक -5, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। एव पूर्वया । पूर्वयाभिजयति । अभिजयति मनुष्यलोकं । अभिजयतीत्यभि-जयति । मनुष्यलोकमुत्तरया । मनुष्यलोकमिति मनुष्य-लोकं । उत्तरया भूयसः । उत्तरयेत्युत् तरया । भूयसो यज्ञ-क्रतून् । यज्ञक्रतूनुप । यज्ञक्रतूनिति यज्ञ-क्रतून् । उपैति । एत्येषा । एषा वै । वै सुमनाः । सुमना नाम । सुꣳ ना इति सु-मनाः । नामेष्टिः । इष्टिर्यं । यमद्य । अद्येज्ञानं । ईज्ञानं पश्चात् । पश्चाच्चंद्रमाः । चंद्रमा अभि । अभ्युदेति । उदेत्यस्मिन् । उदेतीत्युत्-एति । अस्मिन्नेव । एवास्मै । अस्मे लोके । लोकेर्धुकं । अर्धुकं भवति । भवति दाक्षायण यज्ञेन । दाक्षायण यज्ञेन सुवर्गकामः । दाक्षायणयज्ञेनेति दाक्षायण-यज्ञेन । सुवर्गकामो यजेत । सुवर्गकाम इति सुवर्ग-कामः । यजेत पूर्ण- मासे । पूर्णमासे सं । पूर्णमास इति पूर्ण-मासे । सं नयेत् । नयेन्मैत्रावरुण्या । मैत्रावरुण्यामिक्षया । मैत्रावरुण्येति मैत्रा-वरुण्या । आमिक्षयामावास्यायां । अमावास्यायां यजेत । अमावास्यायामित्यमा-वास्यायां । यजेत पूर्णमासे । पूर्णमासे वै । पूर्णमास इति पूर्ण-मासे । वै देवानाꣳ । देवानाꣳ सुतः । सुतस्तेषाꣳ । तेषामेतं । एत मर्धमासं । अर्धमासं पसुतः । अर्धमासमित्यर्ध-मासं । पसुतस्तेषाꣳ । प्रसुत इति प्र-सुतः । तेषाꣳ मैत्रावरुणी । मैत्रावरुणी वशा । मैत्रा वरुणीति मैत्रा-वरुणी । वशामावास्यायां । अमावास्यायामनूबंध्याꣳ । अमावास्यायामित्यमा-वास्यायां । अनूबंध्यायत् । अनूबंध्येत्यनु-बंध्याꣳ ()

काण्ड -2, प्रपाठक -5, अनुवाक -5, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। यत्पूर्वेद्युः । पूर्वेद्युर्यजते । यजते वेदिꣳ । वेदि- मेव । एव तत् । तत्करोति । करोति यत् । यद्वत्सान् । वत्सानपाकरोति । अपाकरोति सदोहविर्धाने । अपाकरोरीत्यप-आकरोति । सदोहविर्धाने एव । सदोहविर्धाने इति सदः-हविर्धाने । एव सं । सं मिनोति । मिनोति यत् । यद्यजते । यजते देवैः । देवैरेव । एव सुत्यां । सुत्याꣳ सं । सं पादयति । पादयति सः । स एतं । एतमर्धमासं । अर्धमासꣳ सधमादꣳ । अर्धमासमित्यर्ध-मासं । सधमाद देवैः ।

स॒ध॒मा॒दमिति॑ सध-मा॒दँ । दे॒वैस्सोमँ॑ । सोम॑ पिबति । पि॒ब॒ति॒ यत् । यन्मै॑त्रावरु॒ण्या । मै॒त्रा॒-व॒रु॒ण्यामिक्षा॑या ।
मै॒त्रा॒व॒रु॒ण्येति॑ मैत्रा-व॒रु॒ण्या । आमिक्षा॑यामावा॒स्या॑यां । अ॒मा॒वा॒स्या॑यां॒ यज॑ते । अ॒मा॒वा॒स्या॑यामित्य॑मा-वा॒स्या॑यां । यज॑ते॒ या
। यैव । ए॒वासौ । अ॒सौ दे॒वानाँ॑ । दे॒वानाँ॑ वृ॒शा । वृ॒शानू॑बंध्याँ॑ । अ॒नू॒बं॒ध्या॑ सो । अ॒नू॒बं॒धेत्य॑नु-बंध्याँ॑ । सो ए॒व । सो
इति॒ सो । ए॒वैषा । ए॒षैतस्य॑ । ए॒तस्य॑ सा॒क्षात् । सा॒क्षाद्वै । सा॒क्षादिति॑ स-अ॒क्षात् । वा ए॒षः । ए॒ष दे॒वान् ।
दे॒वान॒भ्यारो॑हति । अ॒भ्यारो॑हति॒ यः । अ॒भ्यारो॑ह॒तीत्य॑भि-आरो॑हति । य ए॑षां । ए॒षां॒ यज्ञं ()

काण्ड -2, प्रपाठक -5, अनुवाक -5, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। य॒ज्ञम॑भ्या॒रो॑हति । अ॒भ्या॒रो॑हति॒ यथाँ॑ । अ॒भ्या॒रो॒ह॒तीत्य॑भि-आ॒रो॑हति । यथा॒ खलु॑ । खलु॒ वै । वै श्रेया॑न् ।
श्रेया॑नभ्यारू॒ढः । अ॒भ्या॒रू॒ढः का॒मय॑ते । अ॒भ्या॒रू॒ढ इत्य॑भि-आरू॒ढः । का॒मय॑ते तथाँ॑ । तथा॑ करोति । क॒रो॒ति॒ यदि॑ ।
यद॑व॒विध्य॑ति । अ॒व॒विध्य॑ति पापी॑यान् । अ॒व॒विध्य॒तीत्य॑व-विध्य॑ति । पापी॑यान् भवति । भ॒व॒ति॒ यदि॑ । यदि॒ न ।
नाव॒विध्य॑ति । अ॒व॒विध्य॑ति स॒दृङ् । अ॒व॒विध्य॒तीत्य॑व विध्य॑ति । स॒दृङ्ङ्या॒वृत्का॑मः । स॒दृङ्ङिति॑ स-दृङ् । व्या॒वृत्का॑म ए॒तेन॑
। व्या॒वृत्का॑म॒ इति॑ व्या॒वृत्-का॒मः । ए॒तेन॑ य॒ज्ञेन॑ । य॒ज्ञेन॑ यजेत । य॒जे॒त॒ क्षु॒र॒प॒विः । क्षु॒र॒प॒विर्हि॑ । क्षु॒र॒प॒विरिति॑ क्षुरि-
प॒विः । ह्येषः । ए॒ष य॒ज्ञः । य॒ज्ञस्ता॒जक् । ता॒जक्पु॑ण्यः॑ । पु॒ण्यो॑ वा । वा॒ भव॑ति । भव॑ति॒ प्र । प्र वाँ॑ । वा॒ मी॒य॒ते ।
मी॒य॒ते तस्य॑ । तस्ये॒तत् । ए॒तद्व्र॒तं । व्र॒तं न । नानृ॑तं । अनृ॑तं वदेत् । व॒दे॒न्न । नमा॑ऽसं । मा॑ऽसमश्नी॑ यात् ।
अ॒श्नी॒यान्न । न स्त्रिय॑ँ । स्त्रिय॒मुप॑ । उप॑ेयात् । इ॒यान्न । नास्य॑ । अ॒स्य॒पल्पू॑लनेन । पल्पू॑लनेनवासः॑ । वासः॑
पल्पूलयेयुः । पल्पूलयेयु-रे॒तत् । ए॒तद्धि । हि दे॒वाः । दे॒वास्सर्वँ॑ । सर्व॑ न । नकु॑र्वंति॑ । कु॒र्व॒ती॒ति॑ कुर्वंति॑ () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -6, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

एष वै । वै देवरथः । देवरथो यत् । देवरथ इति देव-रथः । यद्दर्शपूर्णमासौ । दर्शपूर्णमासौ यः ।

दर्शपूर्णमासाविति दर्श-पूर्णमासौ । यो दर्शपूर्णमासौ । दर्शपूर्णमासाविष्ट्वा । दर्शपूर्णमासाविति दर्श-पूर्णमासौ ।

इष्ट्वा सोमेन । सोमेन यजते । यजते रथस्पष्टे । रथस्पष्ट एव । रथस्पष्ट इति रथ-स्पष्टे । एवा-वसानै । अवसाने वरै

। अवसान इत्यव-सानै । वरे देवानाँ । देवाना- मव । अवस्यति । स्यत्येतानि । एतानि वै । वा अंगापरूꣳषि ।

अंगापरूꣳषि संवथ्सरस्य । अंगापरूꣳषीत्यंगाँ-परूꣳषि । संवथ्सरस्य यत् । संवथ्सरस्येति सं-वथ्सरस्य । यद्दर्

शपूर्णमासौ । दर्शपूर्णमासौ यः । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । य एवं । एवं विद्वान् । विद्वान् दर्शपूर्णमासौ

। दर्शपूर्णमासौ यजते । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । यज तेऽंगा परूꣳषि । अंगापरूꣳष्येव । अंगा-

परूꣳषीत्यंगाँ- परूꣳषि । एव संवथ्सरस्य । संवथ्सरस्य पति । संवथ्सरस्येति सं-वथ्सरस्य । प्रति दधाति । दधात्येते ।

एते वै । एते इत्येते । वै संवथ्सरस्य । संवथ्सरस्य चक्षुषी । संवथ्सरस्येति सं-वथ्सरस्य । चक्षुषी यत् । चक्षुषी इति

चक्षुषी । यद्दर्शपूर्णमासौ । दर्शपूर्णमासौ यः । दर्शपूर्णमासामिति दर्श-पूर्णमासौ । य एवं । एवं विद्वान् । विद्वान्

दर्शपूर्णमासौ । दर्शपूर्णमासौ यजते । दर्शपूर्णमासावितिदर्श-पूर्णमासौ । यजते ताभ्याँ । ताभ्यामेव । एव सुवर्गं ।

सुवर्गल्लोकं । सुवर्गमिति सुवः-गम् । लोकमनु । अनु पश्यति ()

काण्ड -2, प्रपाठक -5, अनुवाक -6, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। पश्यत्येषा । एषा वै । वै देवानाँ । देवानां विक्राँतिः । विक्राँतिर्यत् । विक्राँतिरिति वि-क्रांतिः । यद्दर्शपूर्णमासौ ।

दर्शपूर्णमासौ यः । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । य एवं । एवं विद्वान् । विद्वान् दर्शपूर्णमासौ ।

दर्शपूर्णमासौ यजते । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । यजते देवानाँ । देवानामेव । एव विक्राँतिं । विक्राँति मनु

। विक्राँतिमिति वि-क्रांतिं । अनु वि । विक्रमते । क्रमत एषः । एष वै । वै देवयानः । देवयानः पंथाँः । देवयान

इति देव-यानः । पंथा यत् । यदर्शपूर्णमासौ । दर्शपूर्णमासौ यः । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । य एवं ।

एवं विद्वान् । विद्वान् दर्श्पूर्णमासौ । दर्श्पूर्णमासौ यजते । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । यजते यः । य एव । एव देवयानः । देवयानः पंथाः । देवयान इति देव-यानः । पंथास्तं । तꣳ समारोहति । समारोहत्येतौ । समारोहतीति सं-आरोहति । एतौ वै । वै देवानाँ । देवानाꣳ हरी । हरी यत् । हरी इति हरी । यद्दर्श-पूर्णमासौ । दर्श्पूर्णमासौ यः । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । य एवं । एवं विद्वान् । विद्वान् दर्श्पूर्णमासौ । दर्श्-पूर्णमासौ यजते । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । यजते यौ । यावेव । एव देवानाँ । देवानाꣳ हरी । हरी ताभ्याँ । हरी इति हरी ()

काण्ड -2, प्रपाठक -5, अनुवाक -6, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। ताभ्यामेव । एवैभ्यः । एभ्यो हव्यं । हव्यं वहति । वहत्येतत् । एतद्वै । दै देवानाँ । देवानामास्यँ । आस्ययत् । यद्दर्शपूर्णमासौ । दर्श्पूर्णमासौ यः । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । य एवं । एवं विद्वान् । विद्वान् दर्श्पूर्णमासौ । दर्श्पूर्णमासौ यजते । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । यजते साक्षात् । साक्षादेव । साक्षादिति स-अक्षात् । एव देवानाँ । देवानामास्यै । आस्ये जुहोति । जुहोत्येषः । एष वै । वै हविर्धानी । हविर्धानी यः । हविर्धानीतिहविः-धानी । यो दर्श्पूर्णमासयाजी । दर्श्पूर्णमासयाजी सायंप्रातः । दर्श्पूर्णमासयाजीति दर्श्पूर्णमास-याजी । सायंप्रातरग्निहोत्रं । सायंप्रातरिति सायं-प्रातः । अग्नि होत्रं जुहोति । अग्निहोत्रमित्यग्नि- होत्रं । जुहोति यजते । यजते दर्श्पूर्णमासौ । दर्श्पूर्णमासा-वहरहः । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । अहरहर्हविर्धानिनाँ । अहरहरित्यहः-अहः । हविर्धानिनाꣳ सुतः । हविर्धानिनामिति हविः-धानिनाँ । सुतो यः । य एवं । एवं विद्वान् । विद्वान् दर्श्पूर्णमासौ । दर्श्पूर्णमासौ यजते । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । यजते हविर्धानी । हविर्धान्यस्मि । हविर्धानीति हविः-धानी । अस्मीति । इति सर्वँ । सर्वमेव । एवास्य । अस्य बर्हिष्यँ । बर्हिष्य दत्तं । दत्तं भवति । भवति देवाः । देवा वै । वा अहः ()

काण्ड -2, प्रपाठक -5, अनुवाक -6, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। अहर्यज्ञियँ । यज्ञियं न । नाविंदन्न् । अविन्दन्ते । ते दर्श्पूर्णमासौ । दर्श्पूर्णमासावपुनन्न् । दर्श्पूर्ण-मासाविति दर्श-पूर्णमासौ । अपुनन्तो । तौ वै । वा एतौ । एतौ पूतौ । पूतौ मेध्यौ । मेध्यौ यत् । यद्दर्श्पूर्णमासौ । दर्श्पूर्णमासौ यः । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । य एवं । एवं विद्वान् । विद्वान् दर्श्पूर्णमासौ । दर्श्पूर्णमासौ यजते । दर्श्पूर्णमासाविति दर्श-पूर्णमासौ । यजते पूतौ । पूतावेव । एवैनौ । एनौ मेध्यौ । मेध्यौ यजते । यजते न । ना मावास्यायां । अमावास्यायां च । अमावास्याया-मित्यमा-वास्यायां । च पौर्णमास्यां । पौर्णमास्यां चं । पौर्णमास्यामिति पौर्ण-मास्यां । च स्तियं । स्त्रिय मुपं । उपेयात् । इयाद्यत् । यदुपेयात् । उपेयान्निरिंद्रियः । उपेयादित्युप-इयात् । निरिंद्रिय- स्सा त् । निरिंद्रिय इति निः-इंद्रियः । स्यात्सोमस्य । सोमस्य वै । वै राज्ञः । राज्ञोऽर्धमासस्यं । अर्धमासस्य रात्रयः । अर्धमासस्येत्यर्ध-मासस्यं । रात्रयः पर्वयः । पर्वय आसन्न् । आसन्तासाम्ँ । तासाममावास्याँ । अमावास्याँ च । अमावास्यामित्यमा-वास्याँ । च पौर्णमासीं । पौर्णमासीं चं । पौर्णमासीमिति पौर्ण-मासीं । च न । नोपं । उपैत् । ऐत्ते ()

काण्ड -2, प्रपाठक -5, अनुवाक -6, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। ते एनं । ते इति ते । एनमभि । अभिसं । समनह्येतां । अनह्येतां तं । तं यक्ष्मः । यक्ष्म आर्च्छत् । आर्च्छद्राजानं । राजानं यक्ष्मः । यक्ष्म आरत् । आरदिति । इति तत् । तद्राजयक्ष्मस्यं । राजयक्ष्मस्य जन्मं । राजयक्ष्मस्येति राज-यक्ष्मस्यं । जन्म यत् । यत्पापीयान् । पापीयानभवत् । अभवत्तत् । तत्पापयक्ष्मस्यं । पापयक्ष्मस्य यत् । पापयक्ष्मस्येति पाप-यक्ष्मस्यं । यज्जायाभ्याँ । जायाभ्यामविंदत् । अविंदत्तत् । तज्जायेन्यस्य । जायेन्यस्य यः । य

एवं । एवमेतेषाँ । एतेषा यक्ष्माणां । यक्ष्माणा जन्म । जन्म वेद । वेद न । नैनँ । एनमेते । एते यक्ष्माः । यक्ष्मा विंदति । विंदति सः । स एते । एते एव । एते इत्येते । एव नमस्यन्न् । नमस्यन्नुप । उपाधावत् । अधावत्ते । ते अब्रूतां । ते इति ते । अब्रूता वरँ । वर वृणावहै । वृणावहा आवं । आवं देवानाँ । देवानाँ भागधे । भागधे असाव । भागधे इति भाग-धे ()

काण्ड -2, प्रपाठक -5, अनुवाक -6, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

। असावावत् । आवदधि । अधि देवाः । देवा इज्यान्ते । इज्यान्ता इति । इति तस्माँत् । तस्माँत्सदृशीनां । सदृशीनाꣳ रात्रीणां । रात्रीणाममावास्यायां । अमावास्यायां च । अमावास्याया-मित्यमा-वास्यायां । च पौर्णमास्यां । पौर्णमास्यां च । पौर्णमास्यामिति पौर्ण-मास्यां । च देवाः । देवा इज्यंते । इज्यंत एते । एते हि । एते इत्येते । हि देवानाँ । देवानाँ भागधे । भागधे भागधाः । भागधे इति भाग-धे । भागधा अस्मै । भागधा इति भाग- धाः । अस्मै मनुष्याँः । मनुष्या भवंति । भवंति यः । य एवं । एवं वेद । वेद भूतानि । भूतानि क्षुधँ । खुधमघ्नन् । अघ्नंथ्सद्यः । सद्योमनुष्याँः । मनुष्या अर्धमासे । अर्ध मासे देवाः । अर्धमास इत्यर्ध-मासे । देवा मासि । मासि पितरः । पितर स्संवथ्सरे । संवथ्सरे वनस्पतयः । संवथ्सर इति सं-वथ्सरे । वनस्पतय-स्तस्माँत् । तस्मादहरहः । अहरहर्मनुष्याँः । अहरहरित्यहः-अहः । मनुष्या अशनं । अशनमिच्छंते । इच्छंतेऽर्धमासे । अर्धमासे देवाः । अर्धमास इत्यर्ध-मासे । देवा इज्यंते । इज्यंते मासि । मासि पितृभ्यः । पितृभ्यः क्रियते । पितृभ्य इति पितृ-भ्यः । क्रियते संवथ्सरे । संवथ्सरे वनस्पतयः । संवथ्सर इति सं-वथ्सरे । वनस्पतयः फलँ । फलं गृह्णंति । गृह्णंति यः । य एवं । एवं वेद । वेद हंति । हंति क्षुधँ । क्षुधं भ्रातृव्यं । भ्रातृव्यमिति भ्रातृव्यं () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -7, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

देवा वै । वैन । न र्चि । ऋचि न । न यजुंषि । यजुंष्यश्रयंत । अश्रयंत ते । ते सामंन्न् । सामंन्नेव । एवाश्रयंत । अश्रयंत हिं । हिं कंरोति । करोति सामं । सामेव । एवाकः । अकर् हिं । हिं कंरोति । करोति यत्रं । यत्रैव । एव देवाः । देवा अश्रयंत । अश्रयंत ततः । ततं एव । एवैनान् । एनान्प । प्र युंक्ते । युंक्ते हिं । हिं कंरोति । करोति वाचः । वाच एव । एवैषः । एष योगः । योगो हिं । हिं कंरोति । करोति प्रजाः । प्रजा एव । प्रजा इतिं प्र-जाः । एव तत् । तद्यजंमानः । यजंमान स्सृजते । सृजते त्रिः । त्रि प्रंथमाम् । प्रथमामनुं । अन्वांह । आह त्रिः । त्रिरुंत्तमां । उत्तमां यज्ञस्यं । उv॒मा-मित्युंत्-तमाम् । यज्ञस्यैव । एव तत् । तद् बर्?सं ()

काण्ड -2, प्रपाठक -5, अनुवाक -7, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। बर् सं नंह्यति । नह्यत्यप्रंस्रꣳसाय । अप्रंस्रꣳसायसंतंतं । अप्रंस्रꣳसायेत्यप्रं-स्रꣳसाय । संतंतमनुं । संतंतमिति सं-ततं । अन्वांह । आह प्राणानाँ । प्राणानां- मन्नाद्यंस्य । प्राणानामितिं प्र-अनानाँ । अन्नाद्यंस्य संतंत्यै । अन्नाद्यस्येत्यन्न-अद्यंस्य । संतंत्या अर्थौं । संतंत्या इति सं-तत्यै । अथो रक्षंसां । अथो इत्यर्थौं । रक्षंसामपंहत्यै । अपंहत्यै राथंतरीं । अपंहत्या इत्यपं-हत्यै । राथंतरीं प्रथमां । राथंतरीमिति राथँ-तरीं । पथमामनुं । अन्वांह । आहराथंतरः । राथंतरो वै । राथंतर इति राथँ-तरः । वा अयं । अयं लोकः । लोक इमम् । इम मेव । एव लोकं । लोकमभि । अभि जंयति । जयति त्रिः । त्रिर्वि । वि गृह्णाति । गृह्णाति त्रयः । त्रय इमे । इमे लोकाः । लोका इमान् । इमानेव । एव लोकान् । लोकानभि । अभिजंयति । जयति बार्हतीं । बार्हतीमुत्तमाम् । उत्तमामनुं । उत्तमामित्युत्- तमाम् । अन्वांह । आह बार्हतः । बार्हतो वै । वा असौ । असौ लोकः । लोकोऽमुम् । अमु मेव । एव लोकं । लोकमभि । अभि जंयति । जयति प्र । प्र वः ()

काण्ड -2, प्रपाठक -5, अनुवाक -7, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। वो॒ वाजा॑ः । वाजा॒ इति॑ । इत्यनि॑रुक्तां । अनि॑रुक्तां प्राजा- प॒त्यां । अनि॑रुक्ता॒मित्यनि॑ः-उ॒क्तां । प्रा॒जा॒प॒त्यामनु॑ । प्रा॒जा॒प॒त्यामिति॑ प्राजा-प॒त्यां । अन्वा॑ह । आ॒ह॒ य॒ज्ञः । य॒ज्ञो वै । वै प्र॒जाप॑तिः । प्र॒जाप॑तिर्य॒ज्ञं । प्र॒जाप॑तिरिति॑ प्र॒जा-प॒तिः । य॒ज्ञमे॒व । ए॒व प्र॒जाप॑तिं । प्र॒जाप॑ति॒ मा । प्र॒जाप॑ति॒मिति॑ प्र॒जा-प॒तिं । आर॑भते । र॒भ॒ते॒ प्र । प्रव॑ः । वो॒ वाजा॑ः । वाजा॒ इति॑ । इत्यनु॑ । अन्वा॑ह । आ॒हान्न॑ं । अन्न॑ं वै । वै वाज॑ः । वाजोऽन्न॑ं । अन्न॑- मे॒व । ए॒वाव॑ । अव॑ रुंधे । रु॒न्धे॒ प्र । प॑वः । वो॒ वाजा॑ः । वाजा॒ इति॑ । इत्यनु॑ । अन्वा॑ह । आ॒ह॒ तस्मा॑त् । तस्मा॑त्प्राचीन॑ं । प्रा॒चीन॒ꣳ॒ रेत॑ः । रेतो॑ धीयते । धी॒य॒तेऽग्न॑ै । अग्न॒ आ । आ या॑हि । या॒हि॒ वी॒तये॑ । वी॒तय॒ इति॑ । इत्या॑ह । आ॒ह॒ तस्मा॑त् । तस्मा॑त्प्रतीची॑ः । प्र॒तीची॑ः प्र॒जाः । प्र॒जा जा॑यंते । प्र॒जा इति॑ प्र-जाः । जा॒यं॒ते॒ प्र । प्र व॑ः । वो॒ वाजा॑ः ()

काण्ड -2, प्रपाठक -5, अनुवाक -7, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। वाजा॒ इति॑ । इत्यनु॑ । अन्वा॑ह । आ॒ह॒ मासा॑ः । मासा॒ वै । वै वाजा॑ः । वाजा॑ अर्धमा॒साः । अ॒र्ध॒मा॒सा अ॒भि॒द्य॑वः । अ॒र्ध॒मा॒सा इत्य॑र्ध-मा॒साः । अ॒भि॒द्य॑वो दे॒वाः । अ॒भि॒द्य॑व॒ इत्य॒भि-द्य॑वः । दे॒वा ह॒विष्म॑तः । ह॒विष्म॑तो॒ गौः । गौर्घृ॒ताची॑ । घृ॒ताची॑ य॒ज्ञः । य॒ज्ञो दे॒वान् । दे॒वाञ्ज॑िगाति । ज॒िगा॒ति॒ यज॑मानः । यज॑मानस्सु॒म्न॒युः । सु॒म्न॒युरि॒दं । सु॒म्न॒युरि॑ति॑ सुम्न-युः । इ॒दम॑सि । अ॒सी॒दं । इ॒दम॑सि । असी॑ति॑ । इ॒त्ये॒व । ए॒व य॒ज्ञस्य॑ । य॒ज्ञस्य॑ प्रि॒यं । प्रि॒यं धाम॑ । धामाव॑ । अव॑ रुंधे । रु॒न्धे॒ यं । यं का॒मये॑त । का॒मये॑त॒ सर्व॑ं । सर्व॒मायु॑ः । आयु॑रियात् । इ॒या॒दिति॑ । इति॒ प्र । प्र व॑ः । वो॒ वाजा॑ः । वाजा॒ इति॑ । इति॒ तस्य॑ । तस्यानूच्य॑ं । अ॒नू॒च्याग्न॑ै । अ॒नू॒च्येत्य॑नु-उच्य॑ं । अग्न॒ आ । आ या॑हि । या॒हि॒ वी॒तये॑ ।

वीतय इति । इति संतंतं । संतंत मुत्तरं । संतंत मिति सं-ततं । उत्तरमर्धर्चं । उत्तर मित्युत्-तरं । अर्धर्चमा । अर्धर्चमित्यर्ध- ऋचं । आ लभेत ()

काण्ड -2, प्रपाठक -5, अनुवाक -7, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। लभेत प्राणेनं । प्राणेनैव । प्राणेनेति प्र-अनेनं । एवास्यं । अस्यापानं । अपानं दाधार । अपानमित्यप-अनं । दाधार सर्वं । सर्वमायुः । आयुरेति । एति यः । यो वै । वा अरत्निं । अरत्निꣳ सामिधेनीनाँ । सामिधेनीनां वेदं । सामिधेनीना मिति सां-इधेनीनाँ । वेदारत्नौ । अरत्नावेव । एव भ्रातृव्यं । भ्रातृव्यं कुरुते । कुरुतेऽर्धर्चौ । अर्धर्चौ सं । अर्धर्चावित्यर्ध-ऋचौ । सं दधाति । दधात्येषः । एष वै । वा अरत्निः । अरत्निस्सामिधेनीनाँ । सामिधेनीनां यः । सामिधेनीना मिति सां-इधेनीनाँ । य एवं । एवं वेदं । वेदा रत्नौ । अरत्ना वेव । एव भ्रातृव्यं । भ्रातृव्यं कुरुते । कुरुत ऋषेर्?ऋषेः । ऋषेर् ऋषेर्वै । ऋषेर् ऋषेरित्य षेः-ऋषेः । वा एताः । एता निर्मिताः । निर्मिता यत् । निर्मिता इति निः-मिताः । यथ्सामिधेन्यः । सामिधेन्यस्ताः । सामिधेन्य इति सां-इधेन्यः । ता यत् । यदसंयुक्ताः । असंयुक्तास्युः । असंयुक्ता इत्यसँ-युक्ताः । स्युः प्रजयाँ । प्रजया पशुभिः । प्रजयेति प्र-जयाँ । पशुभिर्यजमानस्य । पशुभिरिति पशु-भिः । यजमानस्य वि । वितिष्ठेरन् । तिष्ठेरन्नर्ध र्चौ । अर्ध र्चौसं । अर्धर्चावित्यर्ध-ऋचौ । सं दधाति । दधाति सं । सं युनक्ति । युनक्ते व । एवैनाः । एनास्ताः । ता अस्मै । अस्मै संयुक्ताः । संयुक्ता अवरुद्धाः । संयुक्ता इति सं-युक्ताः । अवरुद्धासँर्वां । अवरुद्धा इत्यव-रुद्धाः । सर्वामाशिषँ । आशिषं दुहे । आशिष मित्याँ-शिषँ । दुह इति दुहे () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

अयंज्ञो वै । वा एषः । एष यः । योऽसामा । असामाग्नैँ । अग्न आ । आयाहि । याहि वीतयैँ । वीतय इतिं । इत्याह । आह रथंतरस्यं । रथंत रस्येषः । रथंतरस्येतिं रथं-तरस्यं । एषवर्णः । वर्णस्तं । तं ब्रा॑ । ब्रा समिद्भिः । समिद्भिरंगिरः । समिद्भिरितिं समित्-भिः । अंगिर इतिं । इत्याह । आहवामदेव्यस्यं । वामदेव्यस्येषः । वामदेव्यस्येतिं वाम-देव्यस्यं । एष वर्णः । वर्णो बृहत् । बृहदंग्ने । अग्नेसुवीयैँ । सुवीर्य मितिं । सुवीऱ्य मितिं सु-वीयैँ । इत्याह । आहबृहतः । बृहत एषः । एष वर्णः । वर्णो यत् । य देतं । एतं तृचं । तृचमन्वाहं । अन्वाहं यज्ञं । अन्वाहेत्यनु-आहं । यज्ञ मेव । एव तत् । तत्सामंन्वंतं । सामंन्वंतं करोति । सामंन्वंतमिति सामन्न्-वन्तं । करोत्यग्निः । अग्निरमुष्मिन्न् । अमुष्मिंल्लोके । लोक आसी॑त् । आसींदादित्यः । आदित्यो॑स्मिन्न् । अस्मिन्तौ । ताविमौ । इमौ लोकौ । लोका- वशा॑तौ ()

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। अशा॑तावास्तां । आस्तां ते । ते देवाः । देवा अंब्रुवन्न् । अबुवन्न । एतं । इते मौ । इमौ वि । विपरिं । पर्यूहाम । ऊहामेतिं । इत॑ग्ने । अग्न आ । आयाहि । याहि वीतयैँ । वीतय इतिं । इत्यस्मिन्न् । अस्मिल्लोके । लोके॑ग्निं । अग्निमंदधुः । अदधु र्बृहत् । बृहदंग्ने । अग्ने सुवीयैँ । सुवीर्यमितिं । सुवीर्यमितिं सु-वीयैँ । इत्यमुष्मिन्न् । अमुष्मिंल्लोके । लोक आंदित्यं । आदित्यं ततः । ततो वै । वा इमौ । इमौ लोकौ । लोकावंशाम्यतां । अशाम्यतां यत् । यदेवं । एवमन्वाहं । अन्वाहानयो॑ः । अन्वाहेत्यंनु-आहं । अनयो॑र्लोकयो॑ः । लोकयो- श्शांत्यै॑ । शांत्ये शाम्यंतः । शाम्यंतोऽस्मै । अस्मा इमौ । इमौ लोकौ । लोकौ यः । य एवं । एवं वेदं । वेद पंचंदश । पंचंदश सामिधेनीः । पंचंदशेति पंचं-दश । सामिधेनीरनु॑ । सामिधेनीरितिं सां-इधेनीः । अन्वाह । आहं पंचंदश ()

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। पंचदश वै । पंचदशेति पंच-दश । वा अर्धमासस्य । अर्धमासस्य रात्रयः । अर्धमासस्येत्यर्ध-मासस्य । रात्रयोऽर्धमासशः । अर्धमासशस्संवथ्सरः । अर्धमासश इत्यर्धमास-शः । संवथ्सर आप्यते । संवथ्सर इति सं-वथ्सरः । आप्यते तासाँ । तासां त्रीणि । त्रीणि च । च शतानि । शतानि षष्टिः । षष्टिश्च । चाक्षराणि । अखराणि तावतीः । तावतीस्संवथ्सरस्य । संवथ्सरस्य रात्रयः । संवथ्सरस्येति सं-वथ्सरस्य । रात्रयोऽक्षरशः । अक्षरश एव । अक्षरश इत्यक्षर-शः । एव संवथ्सरं । संवथ्सरमाप्नोति । संवथ्सरमिति सं-वथ्सरं । आप्नोति नृमेधः । नृमेधश्च । नृमेध इति नृ-मेधः । च परुच्छेपः । परुच्छेपश्च । च ब्रह्मवाद्यँ । ब्रह्मवाद्यमवदेतां । ब्रह्मवाद्यमिति ब्रह्म-वाद्यँ । अवदेतामस्मिन् । अस्मिन्दारौँ । दारावार्द्रे । आर्द्रेऽग्निं । अग्निं जनयाव । जनयाव यतरः । यतरो नौँ । नौ ब्रह्मीयान् । ब्रह्मीयानिति । इति नृमेधः । नृमेधोऽभि । नृमेध इति नृ-मेधः । अभ्यवदत् । अवदत्सः । स धूमम् । धूममजनयत् । अजनयत्परुच्छेपः । परुच्छेपोऽभि । अभ्यवदत् । अवदत्सः । सोँऽग्निम् । अग्निमजनयत् । अजनयदृषँ । ऋष इति । इत्यब्रवीत् ()

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। अब्रवीद्यत् । यत्समावत् । समावद्विद्व । विद्व कथा । कथा ह्वं । ह्वमग्निं । अग्निमजीजनः । अजीजनो न । नाहं । अहमिति । इति सामिधेनीनाँ । सामिधेनीनामेव । सामिधेनीनामिति सां-इधेनीनाँ । एवाहं । अहंवर्णँ । वर्णं वेद । वेदेति । इत्यब्रवीत् । अब्रवीद्यत् । यद्धृतवत् । घृतवत्पदं । घृतवदिति घृत-वत् । पदमनूच्यतै । अनूच्यते सः । अनूच्यत इत्यनु-उच्यतै । स आसां । आसांवर्णः । वर्णस्तं । तं ह्वाँ । ह्वा समिद्भिः । समिद्भिरंगिरः । समिद्भिरिति समित्-भिः । अंगिर इति । इत्याह । आह सामिधेनीषु । सामिधेनीष्वेव । सामिधेनीष्विति सां-इधेनीषु । एव तत् । तज्योतिः । ज्योतिर्जनयति । जनयति स्त्रियः । स्त्रियस्तेन । तेन यत् । यदृचः । ऋचः स्त्रियः । स्त्रिय स्तेन । तेन

यत् । यद्गा॑यत्रियः । गा॒य॒त्रिय॒ स्त्रियः॑ । स्त्रिय॒ स्तेन॑ । तेन॒ यत् । यथ्सा॑मिधे॒न्यः॑ । सा॒मि॒धे॒न्यो॑ वृषण्व॒तीं । सा॒मि॒धे॒न्य॑ इति॑ सा-इ॒धे॒न्यः॑ । वृष॑ण्व॒तीम॑नु॑ । वृष॑ण्व॒तीमिति॒ वृषण्॑-व॒तीं॒ । अन्वा॑ह । आ॒ह॒ तेन॑ ()

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। तेन॒ पु॒ꣳ॒स्व॑तीः । पु॒ꣳ॒स्व॑ती॒ स्तेन॑ । तेन॒ सेंद्रा॑ः । सेंद्रा॒स्तेन॑ । सेंद्रा॒ इति॒ स-इ॒न्द्रा॒ः । तेन॑ मिथु॒नाः । मि॒थु॒ना अ॒ग्निः । अ॒ग्निर्दे॒वाना॑ । दे॒वाना॑ दू॒तः । दू॒त आसी॑त् । आसी॑दु॒शना॑ । उ॒शना॑ काव्यः । का॒व्योऽसु॑राणां । असु॑राणा॒ तौ । तौ प्र॒जाप॑तिं । प्र॒जाप॑तिं प्र॒श्नं । प्र॒जाप॑तिमिति॑ प्र॒जा-प॒तिं॒ । प्र॒श्नमै॑तां । ऐता॑ꣳ सः । स प्र॒जाप॑तिः । प्र॒जाप॑तिर॒ग्निं । प्र॒जाप॑तिरिति॑ प्र॒जा-प॒तिः॒ । अ॒ग्निं दू॒तं । दू॒तं वृ॑णीमहे । वृ॒णी॒म॒ह॒ इति॑ । इत्य॒भि । अ॒भि पर्याव॑र्तत । पर्याव॑र्तत॒ ततः॑ । पर्याव॑र्ततेति॑ परि-आव॑र्तत । ततो॑ दे॒वाः । दे॒वा अभ॑वन् । अभ॑वन्प॒रा॑ । पराऽसु॑राः । असु॑रा॒ यस्य॑ । यस्यै॒वं । एव॑ं विदु॒षः । वि॒दु॒षोऽग्निं । अ॒ग्निं दू॒तं । दू॒तं वृ॑णीमहे । वृ॒णी॒म॒ह॒ इति॑ । इत्य॒न्वाह॑ । अ॒न्वाह॒ भव॑ति । अ॒न्वाहेत्य॑नु-आह॑ । भव॑त्या॒त्मना॑ । आ॒त्मना॒ परा॑ । परा॑ऽस्य । अ॒स्य॒ भा॑तृ॒व्यः । भ्रा॒तृ॒व्यो भवति । भ॒व॒त्य॒ध्व॒र॒व॑तीं । अ॒ध्व॒र॒व॑तीमनु॑ । अ॒ध्व॒र॒व॑ती मित्य॑ध्वर-व॒तीं॒ । अन्वा॑ह । आ॒ह॒ भ्रा॒तृ॒व्यं । भ्रा॒तृ॒व्यमे॒व । ए॒वैत॑या॑ ()

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। ए॒त॑या॑ ध्वरति । ध्व॒र॒ति॒ शो॒चिष्के॑शः । शो॒चिष्के॑श॒स्तं । शो॒चिष्के॑श॒ इति॑ शो॒चिः-के॒श॒ः । तमी॑महे । ई॒म॒ह॒ इति॑ । इत्या॑ह । आ॒ह॒ प॒वित्र॑ं । प॒वित्र॑मे॒व । ए॒वै तत् । एत॒द्यज॑मानं । यज॑मानमे॒व । ए॒वैत॑या॑ । ए॒त॒या॑ पवयति । प॒व॒य॒ति॒ समि॑द्धः । समि॑द्धो अग्ने । समि॑द्ध इति॒ सं-इ॒द्ध॒ः । अ॒ग्न॒ आहु॑त । आहु॑तेति॑ । आहु॑तेत्या॑-हु॒त॒ । इत्या॑ह । आ॒ह॒ परि॑धिं । परि॑धिमे॒व । परि॑धिमिति॑ परि-धिं । ए॒वैत॑ं । ए॒त॑ंपरि॑ं । परि॑ं दधाति । दधात्यस्क॑दाय । अस्क॑दाय॒ यत् । यदत॑ः ।

अतऽ ऊर्ध्वं । ऊर्ध्वमभ्यादध्यात् । अभ्यादध्याद्यथाँ । अभ्यादध्या-दित्यभि-आदध्यात् । यथा बहिः परिधि । बहिः परिधि स्कंदति । बहिपरिधीतिं बहिः-परिधि । स्कंदति तादृक् । तादृगेव । एव तत् । तत्त्रयः । त्रयो वै । वा अग्नयः । अग्नयो हव्यवाहनः । हव्यवाहनो देवानाँ । हव्यवाहन इतिं हव्य-वाहनः । देवानाँ कव्यवाहनः । कव्यवाहनः पितृणां । कव्यवाहन इतिं कव्य-वाहनः । पितृणाꣳ सहरक्षाः । सहरक्षा असुराणां । सहरक्षा इतिं सह- रक्षाः । असुराणां ते । त एतर्हिं । एतर्ह्या । आशꣳसते । शꣳसते मां । मां वरिष्यते । वरिष्यते मां ()

काण्ड -2, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -7,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। मामितिं । इतिं वृणीध्वं । वृणीध्वꣳ हव्यवाहनं । हव्यवाहनमितिं । हव्यवाहनमितिं हव्य-वाहनं । इत्याह । आह यः । य एव । एव देवानाँ । देवानां तं । तं वृणीते । वृणीत आर्ष्टेयं । आर्ष्टेयं वृणीते । वृणीते बंधोँ । बंधोरेव । एव न । नैतिं । एत्यथौं । अथो संतत्यै । अथो इत्यथौं । संतत्यै परस्ताँत् । संतत्या इति सं-तत्यै । परस्तादर्वाचः । अर्वाचो वृणीते । वृणीते तस्माँत् । तस्माँत्परस्ताँत् । परस्तादर्वाचः । अर्वाचो मनुष्यान् । मनुष्याँन्पितरः । पितरोऽनु । अनु प्र । प्र पिपते । पिपत इतिं पिपते () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

अग्ने महान् । महाꣳ असि । असीतिं । इत्याह । आह महान् । महान्, हि । ह्येषः । एष यत् । यदग्निः । अग्नि ब्राँह्मण । ब्राह्मणेतिं । इत्याह । आह ब्राह्मणः । ब्राह्मणो हि । ह्येषः । एष भारत । भारतेतिं । इत्याह । आहैषः । एष हि । हि देवेभ्यः । देवेभ्योँहव्यं । हव्यं भरति । भरति देवेद्धः । देवेद्ध इतिं । देवेद्ध इतिं देव-इद्धः । इत्याह । आह देवाः । देवा हि । ह्येतम् । एत मैधत । ऐधत मन्विद्धः । मन्विद्ध इतिं । मन्विद्ध इति मनु-इद्धः । इत्याह ।

आ॒ह॒ मनुः॑ । मनुर्हि । ह्येतम् । एतमुत्त॑रः । उत्त॑रो दे॒वेभ्यः॑ । उत्त॑र इत्युत्-त॑रः । दे॒वेभ्य॒ ऐध॑ । ऐधर्षि॑ष्टुतः । ऋषि॑ष्टुत इति॑ । ऋषि॑ष्टुत इत्यृषि॑- स्तुतः । इत्या॑ह । आ॒हर्षयः । ऋष॑यो हि । ह्येत॑ । एतमस्तु॑वन्न् । अस्तु॑वन्विप्रा॑नुमदितः । विप्रा॑नुमदित॒ इति॑ । विप्रा॑नुमदित॒ इति॒ विप्र॑-अनुमदितः । इत्या॑ह ()

काण्ड -2, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। आ॒ह॒ विप्रा॑ः । विप्रा॒ हि । ह्येते । एते यत् । यच्छु॑श्रुवाꣳसः । शु॒श्रु॒वाꣳस॑ः कविश॒स्तः । क॒विश॒स्त इति॑ । क॒विश॒स्त इति॑ कवि-श॒स्तः । इत्या॑ह । आ॒ह॒ क॒वय॑ः । क॒वयो॒ हि । ह्येते । एते यत् । यच्छु॑श्रुवाꣳसः । शु॒श्रु॒वाꣳसो॒ ब्रह्म॑सꣳशितः । ब्रह्म॑सꣳशित॒ इति॑ । ब्रह्म॑सꣳशित॒ इति॒ ब्रह्म॑-स॒ꣳशि॒तः॒ । इत्या॑ह । आ॒ह॒ ब्रह्म॑सꣳशितः । ब्रह्म॑ सꣳशितो॒ हि । ब्रह्म॑सꣳशित॒ इति॒ ब्रह्म॑-स॒ꣳशि॒तः॒ । ह्येष॑ः । एष घृ॒ताह॑वनः । घृ॒ताह॑वन॒ इति॑ । घृ॒ताह॑वन॒ इति॑ घृत-आ॒ह॒वनः॑ । इत्या॑ह । आ॒ह॒घृ॒ताहु॑तिः । घृ॒ताहु॑तिर्हि । घृ॒ताहु॑तिरिति॑ घृत-आहुतिः । ह्यस्य । अ॒स्य॒ प्रि॒यत॑मा । प्रि॒यात॑मा प्र॒णीः । प्रि॒यत॒मेति॑ प्रि॒य-त॒मा॒ । प्र॒णीर्य॒ज्ञाना॑ । प्र॒णीरिति॑ प्र-नीः । य॒ज्ञाना॒ मिति॑ । इत्या॑ह । आ॒ह॒ प्र॒णीः । प्र॒णीर्हि । प्र॒णीरिति॑ प्र-नीः । ह्येष॑ः । एष य॒ज्ञाना॑ । य॒ज्ञाना॑ꣳ र॒थीः । र॒थीर॑ध्व॒राणा॑ । अ॒ध्व॒राणा॒ मिति॑ । इत्या॑ह । आ॒हैष॑ः । एष हि । हि दे॑वर॒थः । दे॒व॒र॒थोऽ॑ऽतूर्तः॑ । दे॒व॒र॒थ इति॑ देव-र॒थः । अ॒तूर्तो॒ होता॑ । होते॑ति॑ । इत्या॑ह । आ॒ह॒ न । न हि । ह्येत॑ । एत॑ं कः । कश्च॒न ()

काण्ड -2, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। च॒न त॑र॒ति । त॒र॒ति॒ तूर्णिः॑ । तूर्णि॑र्हव्य॒वाट् । ह॒व्य॒वाडिति॑ । ह॒व्य॒वाडिति॑ हव्य-वाट् । इत्या॑ह । आ॒ह॒ सर्व॑ं । सर्व॑ꣳ हि । ह्येष॑ः । एष त॑र॒ति । त॒र॒त्या स्पात्र॑ं । आस्पात्र॑ं जुहूः । जुहू॑र्देवा॒नाम् । दे॒वा॒नामिति॑ । इत्या॑ह । आ॒ह॒ जुहूः॑ ।

जुहूर्हि । ह्येषः । एष देवानाँ । देवानाँ चमसः । चमसो देवपानः । देवपान इति । देवपान इति देव-पानः । इत्याह । आह चमसः । चमसोहि । ह्येषः । एष देवपानः । देवपानोऽरान् । देवपान इति देव-पानः । अराꣳ इव । इवाग्नै । अग्ने नेमिः । नेमिर्देवान् । देवाꣳस्त्वं । त्वं परिभूः । परिभूरसि । परिभूरिति परि-भूः । असीति । इत्याह । आह देवान् । देवान्, हि । ह्येषः । एष परिभूः । परिभूर्यत् । परिभूरिति परि-भूः । यद्भू यात् । ब्रूयादा । आवह । वहदेवान् । देवान्देवयते । देवयते यजमानाय । देवयत इति देव-यते । यजमानायेति । इति भ्रातृव्यं । भ्रातृव्यमस्मै ()

काण्ड -2, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। अस्मै जनयेत् । जनये दा । आवह । वहदेवान् । देवान्, यजमानाय । यजमानायेति । इत्याह । आह यजमानं । यजमान मेव । एवै तेनं । एतेनं वर्धयति । वर्धयत्यग्निं । अग्निमग्ने । अग्न आ । आवह । वह सोमँ । सोममा । आवह । वहेति । इत्याह । आह देवताँ । देवतां एव । एव तत् । तदथापूर्वं । यथापूर्वमुप । यथापूर्वमिति यथा-पूर्वं । उप ह्वयते । ह्वयत आ । आ च । चाग्ने । अग्ने देवान् । देवान्, वह । वह सुयजाँ । सुयजा च । सुयजेति सु-यजाँ । च यज । यज जातवेदः । जातवेद इति । जातवेद इति जात-वेदः । इत्याह । आहाग्निं । अग्नि मेव । एव तत् । तत्सं । सꣳ श्यति । श्यति सः । सौऽस्य । अस्य सꣳशितः । सꣳशितो देवेभ्यः । सꣳशित इति सं-शितः । देवेभ्यो हव्यं । हव्यं वहति । वहत्यग्निः । अग्निर् होताँ ()

काण्ड -2, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। होतेति। इत्याह। आहाग्निः। अग्निर्वै। वै देवानाँ। देवानाꣳ होताँ। होता यः। य एव। एव देवानाँ। देवानाꣳ होताँ। होता तं। तं वृणीते। वृणीते स्मः। स्मो वयं। वयमिति। इत्याह। आहात्मानँ। आत्मानमेव। एव सत्त्वं। सत्त्वं गमयति। सत्त्वमिति सत्-त्वं। गमयति साधु। साधु तैं। ते यजमान। यजमान देवताँ। देवतेति। इत्याह। आहाशिषँ। आशिषमेव। आशिषमित्याँ-शिषँ। एवै तां। एतामा। आशाँस्ते। शास्ते यत्। यद्ब्रूयात्। ब्रूयाद्यः। योँऽग्निं। अग्निꣳ होतारं। होतारमवृथाः। अवृथा इति। इत्यग्निनाँ। अग्निनाँ- भयतः। उभयतो यजमानं। यजमानं परि। परिगृह्णीयात्। गृह्णीयात्प्रमायुकः। प्रमायुकस्स्यात्। प्रमायुक इति प्र-मायुकः। स्याद्यजमानदेवत्याँ। यजमान देवत्या वै। यजमानदेवत्येति यजमान-देवत्याँ। वै जुहूः। जुहूर्भ्रातृव्यदेवत्याँ। भ्रातृव्य देवत्योपभृत्। भ्रातृव्यदेवत्येति भ्रातृव्य-देवत्याँ। उपभृद्यत् ()

काण्ड -2, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। उपभृदित्युप-भृत्। यद्वै। द्वे इव। द्वे इति द्वे। इव ब्रूयात्। ब्रूयाद्भ्रातृव्यं। भ्रातृव्यमस्मै। अस्मै जनयेत्। जनयेद्धृतवतीं। घृतवतीमध्वर्यो। घृतवतीमिति घृत-वतीं। अध्वर्यो स्रुचँ। अध्वर्य्यो इत्यध्वर्यो। स्रुचमा। आस्य स्व। अस्य स्वेति। इत्याह। आह यजमानं। यजमानमेव। एवैतेनं। एतेन वर्धयति। वर्धयति देवायुवँ। देवायुवमिति। देवायुवमिति देव-युवँ। इत्याह। आह देवान्। देवान्, हि। ह्येषा। एषाऽवति। अवति विश्ववारां। विश्ववारामिति। विश्ववारामिति विश्व-वारां। इत्याह। आह विश्वँ। विश्वꣳ हि। ह्येषा। एषाऽवति। अवतीडामहे। ईडामहे देवान्। देवाꣳ ईडेन्यान्। ईडेन्याँन्नमस्यामं। नमस्यामंनमस्यान्। नमस्यान्, यजाम। यजाम यज्ञियान्। यज्ञियानिति। इत्याह। आह मनुष्याँ। मनुष्या वै। वा ईडेन्याँ। ईडेन्याँ पितरः। पितरो नमस्याँ। नमस्या देवाः। देवा यज्ञियाँ। यज्ञिया देवताँ। देवता एव। एव तत्। तद्यथा भागं। यथा भागं यजति। यथाभागमिति यथा-भागं। यजतीति यजति () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

त्रीꣳस्तृचान् । तृचाननु । अनु ब्रूयात् । ब्रूयाद्राजन्यस्य । राजन्यस्य त्रयः । त्रयो वै । वा अन्ये । अन्ये राजन्याँत् । राजन्याँत्पुरुषाः । पुरुषा ब्राह्मणः । ब्राह्मणो वैश्यः । वैश्यः शूद्रः । शूद्रस्तान् । तानेव । एवास्मै । अस्मा अनुकान् । अनुकान्करोति । अनुकानित्यनु-कान् । करोति पंचदश । पंचदशानु । पंचदशेति पंच-दश । अनु ब्रूयात् । ब्रूयाद्राजन्यस्य । राजन्यस्य पंचदशः । पंचदशो वै । पंचदश इति पंच-दशः । वै राजन्यः । राजन्यःस्वे । स्व एव । एवैनँ । एनꣳ स्तोमँ । स्तोमे प्रति । प्रतिष्ठापयति । स्थापयति त्रिष्टुभाँ । त्रिष्टुभा परि । परि दध्यात् । दध्यादिंद्रियं । इंद्रियं वै । वै त्रिष्टुक् । त्रिष्टुगिंद्रियकामः । इंद्रियकामः खलु । इंद्रियकाम इतीँन्द्रिय-कामः । खलु वै । वै राजन्यः । राजन्यो यजते । यजते त्रिष्टुभाँ । त्रिष्टुभेव । एवास्मै । आस्मा इंद्रियं । इंद्रियं परि । परि गृह्णाति । गृह्णाति यदि । यदि कामयेत ()

काण्ड -2, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। कामयेत ब्रह्मवर्चसं । ब्रह्मवर्चसमꣳस्तु । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । अस्विति । इति गायत्रिया । गायत्रिया परि । परिदध्यात् । दध्याद्ब्रह्मवर्चसं । ब्रह्मवर्चसं वै । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । वै गायत्री । गायत्री ब्रह्मवर्चसं । ब्रह्मवर्चसमेव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । एव भवति । भवति सप्तदश । सप्तदशानु । सप्तदशेति सप्त-दश । अनुब्रूयात् । ब्रूया द्वैश्यस्य । वैश्यस्य सप्तदशः । सप्तदशो वै । सप्तदश इति सप्त-दशः । वै वैश्यः । वैश्यः स्वे । स्व एव । एवैनँ । एनꣳ स्तोमँ । स्तोमे प्रति । प्रतिष्ठापयति । स्थापयति जगत्या । जगत्या परि । परिदध्यात् । दध्याज्जागताः । जागता वै । वै पशवः । पशवः पशुकामः । पशुकामः खलु । पशुकाम इति पशु-कामः । खलु वै ।

वै वैश्यः । वैश्यो यजते । यजते जगत्या । जगत्येव । एवास्मै । अस्मे पशून् । पशून् परि । परि गृह्णाति । गृह्णात्येकविꣳशतिं । एकविꣳशतिमनु । एकविꣳशतिमित्येक-विꣳशतिं । अनु ब्रूयात् । ब्रूयात्प्रतिष्ठाकामस्य । प्रतिष्ठाकामस्यैकविꣳशः । प्रतिष्ठकामस्येति प्रतिष्ठा-कामस्य । एकविꣳशः स्तोमानां । एकविꣳश इत्येक-विꣳशः । स्तोमानां प्रतिष्ठा । प्रतिष्ठा प्रतिष्ठित्यै । प्रतिष्ठेति प्रति-स्था । पतिष्ठित्यै चतुर्विꣳशतिं । प्रतिष्ठित्या इति प्रति-स्थित्यै ()

काण्ड -2, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। चतुर्विꣳशतिमनु । चतुर्विꣳशतिमिति चतुः-विꣳशतिं । अनु ब्रूयात् । ब्रूयाद्ब्रह्मवर्चस-कामस्य । ब्रह्मवर्चसकामस्य चतुर्विꣳशत्यक्षरा । ब्रह्मवर्चसकामस्येति ब्रह्मवर्चस-कामस्य । चतुर्विꣳशत्यक्षरा गायत्री । चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति-अक्षरा । गायत्री गायत्री । गायत्री ब्रह्मवर्चसं । ब्रह्मवर्चसं गायत्रिया । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । गायत्रियैव । एवास्मै । अस्मे ब्रह्मवर्चसं । ब्रह्मवर्चसमव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । अव रुंधे । रुंधे त्रिꣳशतँ । त्रिꣳशतमनु । अनु ब्रूयात् । ब्रूयादन्नकामस्य । अन्नकामस्य त्रिꣳशदक्षरा । अन्नकामस्येत्यन्न-कामस्य । त्रिꣳशदक्षरा विराट् । त्रिꣳशदक्षरेति त्रिꣳशत्-अक्षरा । विराडन्न । विराडिति वि-राट् । अन्न विराट् । विराड्विराजाँ । विराडिति वि-राट् । विराजेव । विराजेति वि-राजाँ । एवास्मै । अस्मा अन्नाद्य । अन्नाद्यमव । अन्नाद्यमित्यन्न-अद्य । अव रुंधे । रुंधे द्वात्रिꣳशतं । द्वात्रिꣳशतमनु । अनु ब्रूयात् । ब्रूयात्प्रतिष्ठाकामस्य । प्रतिष्ठाकामस्य द्वात्रिꣳशदक्षरा । प्रतिष्ठाकामस्येति प्रतिष्ठा-कामस्य । द्वात्रिꣳश दक्षराऽनुष्टुक् । द्वातिꣳशदक्षरेति द्वात्रिꣳशत्-अक्षरा । अनुष्टुगनुष्टुप् । अनुष्टुगित्यनु-स्तुक् । अनुष्टुप्छंदसां । अनुष्टुबित्यनु-स्तुप् । छंदसां प्रतिष्ठा । प्रतिष्ठा प्रतिष्ठित्यै । प्रतिष्ठेति प्रति-स्था । प्रतिष्ठित्यै षट्त्रिꣳशतं । प्रतिष्ठित्या इति प्रति-स्थित्यै । षट्त्रिꣳशतमनु । षट्त्रिꣳशतमिति षट्-त्रिꣳशतं । अनु ब्रूयात् । ब्रूयात्पशुकामस्य । पशुकामस्य षट्त्रिꣳशदक्षरा । पशुकामस्येति पशु-कामस्य । षट्त्रिꣳशदक्षरा बृहती । षट्त्रिꣳशदक्षरेति षट्त्रिꣳशत्- अक्षरा । बृहती बार्हताः । बार्हताः पशवः । पशवो बृहत्या । बृहत्येव । एवास्मै । अस्मे पशून् ()

काण्ड -2, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -हौत्र-ब्राह्मणम्,

। पशूनव । अवरुंधे । रुंधे चतुश्चत्वारि२-शतं । चतुश्चत्वारि२शतमनु । चतुश्चत्वारि२शतमितिचतुः-चत्वारि२शतं । अनु ब्रूयात् । ब्रूयादिंद्रिय कामस्य । इंद्रियकामस्य चतुश्चत्वारि२शदक्षरा । इंद्रिय कामस्येतींद्रिय-कामस्य । चतुश्चत्वारि२शदक्षरा त्रिष्टुक् । चतुश्चत्वारि२शदक्षरेति चतुश्चत्वारि२शत्-अक्षरा । त्रिष्टुगिंद्रियं । इंद्रियं त्रिष्टुप् । त्रिष्टुप्त्रिष्टुभौ । त्रिष्टुभेव । एवास्मै । अस्मा इंद्रियं । इंद्रियमव । अव रुंधे । रुंधेऽष्टाचत्वार२शतं । अष्टाचत्वारि२शतमनु । अष्टाचत्वारि२शत मित्यष्टा-चत्वारि२शतं । अनु ब्रूयात् । ब्रूयात्पशु-कामस्य । पशुकामस्याष्टा चत्वारि२शदक्षरा । पशुकामस्येति पशु-कामस्य । अष्टाचत्वारि२शदक्षरा जगती । अष्टाचत्वारि२ शदक्षरेत्यष्टा-चत्वारि२शत्-अक्षरा । जगती जागताः । जागताः पशवः । पशवो जगत्या । जगत्येव । एवास्मै । अस्मै पशून् । पशूनव । अव रुंधे । रुंधे सर्वाणि । सर्वाणि छंदा२ंसि । छंदाग्?स्यनु । अनु ब्रूयात् । ब्रूयाद्बहुयाजिनः । बहुयाजिनस्सर्वाणि । बहुयाजिन इति बहु-याजिनः । सर्वाणि वै । वा एतस्य । एतस्य छंदा२ंसि । छंदा२स्यवरुद्धानि । अवरुद्धानि यः । अवरुद्धानीत्यव-रुद्धानि । यो बहुयाजी । बहुयाज्यपरिमितं । बहुयाजीति बहु-याजी । अपरिमितमनु । अपरिमितमित्यपरि-मितं । अनु ब्रूयात् । ब्रूयादपरिमितस्य । अपरिमितस्यावरुध्यै । अपरिमितस्येतपरि-मितस्य । अवरुध्या इत्यव-रुध्यै () ॥॥

काण्ड -2, प्रपाठक -5, अनुवाक -11, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

निवीतं मनुष्यांणां । निवीतमिति नि-वीतं । मनुष्यांणां प्राचीनावीतं । प्राचीनावीतं पितृणां । प्राचीनावीतमिति प्राचीन-आवीतं । पितृणामुपवीतं । उपवीतं देवानाँ । उपवीतमित्युप-वीतं । देवानामुप । उप व्ययते । व्ययते देवलक्ष्मम् । देवलक्ष्म मेव । देवलक्ष्ममिति देव-लक्ष्मम् । एव तत् । तत्कुरुते । कुरुते तिष्ठन्न् । तिष्ठन्ननु । अन्वाह । आह तिष्ठन्न्

। तिष्ठन्, हि । ह्याश्रुततरं । आश्रुततरं वदति । आश्रुततरमित्याश्रुत-तरं । वदति तिष्ठन्न् । तिष्ठननु । अन्वाह । आह सुवर्गस्य । सुवर्गस्य लोकस्य । सुवर्गस्येति सुवः-गस्य । लोकस्याभिजित्ये । अभिजित्या आसीनः । अभिजित्या इत्यभि-जित्ये । आसीनो यजति । यजत्यस्मिन् । अस्मिन्नेव । एव लोके । लोके प्रति । प्रति तिष्ठति । तिष्ठति यत् । यत्क्रौंचं । क्रौंचमन्वाह । अन्वाहासुरं । अन्वाहेत्यनु- आह । आसुरं तत् । तद्यत् । यन्मंद्रं । मंद्रं मानुषं । मानुषं तत् । तद्यत् । यदंतरा । अंतरा तत् । तत्सदेवं । सदेवमंतरा । सदेवमिति स-देवं । अंतराऽनूच्यँ । अनूच्यꣳ सदेवब्राय । अनूच्यमित्यनु- उच्यँ । सदेवब्रायं विद्वाꣳसः । सदेवब्रायेति सदेव-ब्राय । विद्वाꣳसो वै ()

काण्ड -2, प्रपाठक -5, अनुवाक -11, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -पौरोडाशिक-ब्राह्मणम्,

